श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

कन्दाडै श्रीमद्गोपालार्यमहादेशिकैः अनुगृहीतम्

# ॥ श्रीमत् आचार्यसप्तशती ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

Our sincere thanks to *bhaṭṭarpirān paravastu vilakkuḍi sundararājan varadarājan* for proof-reading this text.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमत् आचार्यसप्तशती ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

## बाल काण्डः

नूतनजलदश्यामं रामं रामाभिरामवामाङ्कम्।
विनतत्राणविनिद्रं वन्दे विज्ञानदायिचिन्मुद्रम् ॥ 1 ॥

महितं तन्त्रचतुष्टयपारं गमितैरनेकशिष्यगणैः।
चम्पकवनैकवसतिं गोपालार्यं पितामहमुपासे ॥ 2 ॥

यन्नामसाम्यमात्रं निगमान्तगुरोश्चरित्रसङ्कथने।
प्रोत्साहयते मामपि मिततममतिमल्पविज्ञानम् ॥ 3 ॥

शिष्यानुग्रहदक्षानगाधबोधान् गुरून् मम पितृव्यान्।
नवसालपुरीदानाध्यक्षान् प्रणमामि कृष्णार्यान् ॥ 4 ॥

आर्यगुणग्रहणरता दोषान् शब्दार्थयोः सहिष्यन्ते।
माक्षिकमपेक्षमाणाः किमु क्षमन्ते न मक्षिकादंशान् ॥ 5 ॥

का हानिरपरितोषात् तेषां दूषयति यन्मनोऽसूया।
अखिलाह्लादिन इन्दोरन्धापरितोषणेन को दोषः ॥ 6 ॥

अस्ति हि काञ्चीनाम्नी जनताक्षेमङ्करी नगरी।
माधवमाराधयितुं यत्र विधाता ततान हयमेधम् ॥ 7 ॥

काञ्चीति नाम यस्याः कमलाकान्तोऽत्र कञ्जपीठेन।
अञ्चित इत्यमुमर्थं स्पष्टं शिष्टान् समाचष्टे॥ **8** ॥

त्रिदशालयतक्ष्णा किल तुष्ट्यै स्रष्टुर्यियक्षमाणस्य।
त्वष्ट्रा विनिर्मिता या किमु वर्ण्यं रामणीयकं तस्याः॥ **9** ॥

फुल्लारविन्दनिर्यन्मकरन्दाम्रेड्यमानमाधुर्या।
कल्मषमोषणधुर्या फणिपतिसरसी विराजते यत्र॥ **10** ॥

प्रतिबिम्बितस्सरस्यां यस्यां सूर्यस्तरङ्गसाहस्र्याम्।
फणमणिसहस्रशोभस्तनुते सार्थामनन्ताख्याम्॥ **11** ॥

वेगवतीरूपधृता वाण्या विजिघांसितं व्रतं हि विधेः।
सत्यमभूत् क्षेत्रेऽस्मिन् सत्यव्रतनामतास्य सार्थैव॥ **12** ॥

सफलीकरणच्छलतो विधिना विधिवत्कृतस्य यागस्य।
करिगिरिशिरोविहारी यत्र मुरारिश्श्रितेष्टदो जयति॥ **13** ॥

अपदिश्य किञ्चिदित्थं यद्दिशतीष्टानि शिष्टवर्गेभ्यः।
द्विरदाद्रिनायकोऽसौ प्रथते तस्माद्धि वरदराज इति॥ **14** ॥

तस्यां पुर्यामासीद्यज्वा नाम्ना हि पुण्डरीकाक्षः।
विश्वामित्रमहामुनिसन्ततिकलशार्णवस्य पूर्णेन्दुः॥ **15** ॥

वाणीविलासपात्रं काञ्च्यां कृतयज्ञतोषितरमेशम्।
चतुराननं च सन्तो मुदिता यमुदाहरन्ति धातारम्॥ **16** ॥

धीरात्तस्मात्सूरेः सुगुणोऽनन्ताभिधस्तनयः।
सहृदयहृदयानन्दी मलयादिव चन्दनो जज्ञे॥ **17** ॥

अत्रिमुनिगोत्रवारिजमित्रश्रीरङ्गराजविबुधमणेः।
तनयामुपायताऽसौ तोतारम्बाभिधामनघाम्॥ **18** ॥

नामाकर्णनमात्रभ्रंशितदुर्वादिगर्वसर्वस्वः।
स हि वादिहंसजलदाचार्यो यस्याः सहोदरो धीरः॥ **19** ॥

कमलाकान्तमनन्तः कलयन्नानन्दतुन्दिलस्वान्तः।
काञ्च्यां साकं दारैरतिवाहयति स्म कतिचनाहानि॥ **20** ॥

अत्रान्तरेऽचिचिन्तत् पन्नगनगनायको धरणौ।
उद्घोषयितुं तत्त्वं घण्टा मे प्रेषणीयेति॥ **21** ॥

कलिमलकल्मषधिषणैः प्रकटप्रच्छन्ननास्तिककदम्बैः।
निगमान्तसिद्धमर्थं दूषितमालक्ष्य येन पुरा॥ **22** ॥

अचलमिव निश्चलत्वं प्रापयितुं तं रहस्यार्थम्।
फणिपतिशैलो यतिपत्याकारेणावनाववातारि॥ **23** ॥

कमलोपलाळ्यचरणो विहरणपदवीषु वेदशिखरेषु।
कण्टकसङ्कुलभावं प्रसृतं सहतां कथङ्कारम्॥ **24** ॥

क्षुद्रोऽपि हन्त यतते विहरणभूमिं विकण्टकीकर्तुम्।
नाद्भुतमेतत्सद्भिर्लक्ष्मीकान्तस्तथा तनोतीति॥ **25** ॥

कुमतिपरिकल्पितार्थैर्दोषोन्मेषेषु वेदेषु।
नारायणस्य शङ्के सञ्जाता श्वासकासशङ्केति॥ **26** ॥

इत्थं सङ्कल्पितवति भगवति परिपक्वभागधेयचयः।
स कदाचिदनन्तार्यो रात्रौ यामावशिष्टायाम्॥ **27** ॥

स्वप्नेऽदर्शत्पुरुषं कञ्चन कन्दर्पकोटिसौन्दर्यम्।
कमलावनमालाभ्यां कौस्तुभमणिना च भासुरोरस्कम्॥ **28** ॥

दधतं काञ्चीग्रथितं धिक्कृतनिष्टप्तकाञ्चनं वसनम्।
आजानुदीर्घबाहुद्वय परिरब्धावनीनीळम्॥ **29** ॥

कुण्डलमण्डितगण्डं बिभ्रतमधिमौळि हाटककिरीटम्।
शङ्खसुदर्शनविलसत्पाणिं दयमाननयनान्तम्॥ **30** ॥

तुङ्गं सुमेरुशृङ्गं श्रयतो नूत्नस्य जलदस्य।
आभामनुकुर्वाणं किञ्चन सौवर्णपीठमध्यास्य॥ **31** ॥

दृष्ट्वैव देवमग्रेऽनन्तसुधीर्विस्मितान्तरङ्गोऽयम्।
निद्रारम्भध्याताकारानुकृतेर्हरिमवेदीत्॥ **32** ॥

कौतुकपरवशहृदयः संमोदाश्रूणि वर्षुकोऽतितमाम्।
पाद्यार्घ्ये अप्यददात् पुष्पाञ्जलिभिश्च पूजयामास॥ **33** ॥

भक्त्या गद्गदकण्ठः किं वा कर्तव्यमित्यजानानः।
अवमं मामव भगवन्निति शश्वत्प्रण्यपतदुरुकम्पः॥ **34** ॥

मा भैषीरिति बाहुभिरुत्थाप्यैनं गजेन्द्रसन्त्राता।
आचष्ट स्पष्टममुं घनगम्भीरस्वरो गिरं मधुराम्॥ **35** ॥

वत्स! वृषाद्रिशिरस्तः प्राप्तं मां श्रीनिवासमवगच्छ।
शुभतमगुणगणभरितं तनयं विनयोज्ज्वलं प्रयच्छामि॥ **36** ॥

भाद्रे मासे वृषगिरिमागच्छास्माकमुत्सवो भविता।
निष्कारणकरुणोऽसावनुशिष्येत्थं तिरोदधे सद्यः॥ **37** ॥

बालार्ककोटिलळितं कमलाकमनं विचिन्वानः।
विलुठन् शयनेऽबुध्यत निरचैषीत्स्वप्न एव दृष्ट इति॥ **38** ॥

रोमाञ्चितमूर्तिरभूत् करुणामनणीयसीं विचिन्त्य विभोः।
हृष्टमनाश्शयनीयात् स्विद्यद्गात्रो गुरुरुदस्थात्॥ **39** ॥

सानन्दं प्रेयस्यै विनिवेद्यामुं प्रियमुदन्तम्।
प्रत्यैक्षिष्ट स कालं तं किल हितया तया साकम्॥ **40** ॥

अथ शेषशैलनेतुः शिष्टजनानन्दकन्दळीकन्दः।
जगदुज्जीवनहेतुर्भाद्रे मास्युत्सव उपागात्॥ **41**॥

हरिवचनामृततृप्तो गुरुरेष गिरिं सदार आरुक्षत्।
श्रीवासालयकेतन शिखरं सोऽप्युत्सवाय पक्षीन्द्रः॥ **42**॥

मन्देतरमोदोदयखण्डितमार्गश्रमो मुकुन्दस्य।
पादारविन्दमनमत् ध्वस्ततमस्सन्ततिं तमस्तावीत्॥ **43**॥

जगति जनं जनमस्मिन् मारं मारं च खिद्यमानानाम्।
भगवन्नभयाय भवान् जागर्त्येका गतिर्भविनाम्॥ **44**॥

स्वीकृत्याञ्जलिमूल्यं पणसे स्वपदं ददत्पणायद्भिः।
आयव्ययचिन्ता ते का वा लक्ष्मीश नित्यतृप्तस्य॥ **45**॥

तत्तादृशपारम्यो मत्स्याकृत्या स्फुटं व्यवारीस्त्वम्।
सद्विद्यायै सूनोः कथमपि चतुराननस्य यत्यमिति॥ **46**॥

कमठाकृतिना कृपया मज्जनसमकालमुद्धृतेऽपि गिरौ।
आवर्तगर्तपूरकडिण्डीर इति क्षणं सुरैर्मुमुहे॥ **47**॥

श्वेतवराहाकारो देवैर्दृष्टस्त्वमुद्धरन् धरणीम्।
अखिलाह्लादी कश्चन सन्ततपूर्णो मृगाङ्क एष इति॥ **48**॥

दंष्ट्राभा वनमाला रिपुरक्तझरी च सङ्गता अदधुः।
नृहरेस्ते किल वक्षसि गङ्गायमुनासरस्वतीशोभाम्॥ **49**॥

वामनरूपेण सुरान् भवता गोपायता विवृतम्।
कथमप्यपरोपकृतौ यतमानो द्रागियात्प्रवृद्धिमिति॥ **50**॥

अतिगम्भीरं त्वां किल दृष्ट्वा कटिलग्नमौञ्जीकम्।
अपसस्रे वारिधिना मन्दरधरशङ्कया नियतम्॥ **51**॥

शबरीदत्तः कन्दः सादरमादाय येन परिभुक्तः।
भक्तिक्रेयं तादृक्सौलभ्यं व्याचकार तं वन्दे॥ **52** ॥

वामाङ्कमधिवसन्त्या लावण्यझरी विदेहतनयायाः।
यस्मिन् महेन्द्रनीलाचलनिलया चन्द्रिकेव बाभाति॥ **53** ॥

सिंहासनान्तिकस्थो दक्षिणचरणं प्रवाळमृदु यस्य।
जीवितफलमिति वहते हनुमान् सत्फलजिघृक्षुराबाल्यात्॥ **54** ॥

उद्धृतकुरुपुरधरणीः खर्वीकृतरेवतीरमणीः।
हालधरीर्लीलास्ते यमुनासम्भेदनीः स्मराम्यतुलाः॥ **55** ॥

परमदययावतीर्णं परमपदात्त्वाम् परोरजसः।
गोकुलधूळीपिञ्जरमीडे गोपालबालकाकारम्॥ **56** ॥

विद्रावयितुं कल्मषबहुळं कलिपूरुषं परुषम्।
सरयं हयमारूढो धरणावाविर्भविष्यसि दयाळो !॥ **57** ॥

इत्थं स्तुत्वाऽष्टादशवाद्यैः दिङ्नागसौखशायनिकम्।
उत्सवमनुभूय विभोः श्रुतियुगळीगीयमानविभवस्य॥ **58** ॥

उपकार्यां गुरुरगमत् चरमाचलशृङ्गमंशुमाली च।
सन्ध्यामुपास्य भुक्त्वा गुरुरस्वाप्सीद्धरिं हृदि ध्यायन्॥ **59** ॥

तस्यामेव निशायां तस्मै पूर्वं प्रतिश्रुतां वाणीम्।
सफलीकर्तुं भगवान् स जजागाराथ सत्यसङ्कल्पः॥ **60** ॥

धवळोर्ध्वपुण्ड्रलळितद्विजरूपधरो विचित्रमायावी।
सुरवैरिगर्वहन्त्रीं घण्टां परिगृह्य मन्दिरान्निरगात्॥ **61** ॥

उच्चैराह्वयदनघो गत्वानन्तार्यमन्दिराळिन्दम्।
अद्राक्षीद्विप्रेन्द्रं गुरुरुद्बुद्धः कवाटमुद्घाट्य॥ **62** ॥

भगवन् को नु भवानिति पृच्छन्नतिमात्रविस्मितोऽनंसीत्।
तद्भक्त्याकृष्टमना द्विजरूपी प्रत्यभाणीत्तम्॥ **63**॥

अत्रत्यो विप्रोऽहं हरिदत्ताभ्याहृता च घण्टेयम्।
स्वीकुर्वेनां निगिरतु तव पत्नी सोष्यते च सुतमनघम्॥ **64**॥

इत्यादिश्य प्रादात् घण्टां गुरुरप्यगृह्णात्ताम्।
लघुभूतां तामगिळन्मुदिता दयिताप्यमुष्य सङ्गृह्य॥ **65**॥

न्यवृतत्कैतवविप्रः कार्यं चिरकालकाङ्क्षितं कृत्वा।
इत्थं ह्यनन्तसूरेः स्वप्नोऽभूदद्भुतो रजनौ॥ **66**॥

झटिति प्रबुध्य चित्रं स्वप्नचरित्रं ब्रुवाणेऽस्मिन्।
रजनी तु सा व्यरंसीत् उदगान्मार्तण्डमण्डलमखण्डम्॥ **67**॥

प्राभातिकार्चनार्थं देवगृहानर्चका विविशुः।
नैक्षिषत तत्र घण्टामन्विष्यन्तो व्यचारिषुः परितः॥ **68**॥

क्वाप्येनां नाविन्दन् समशेरत ते परस्परमुदीक्ष्य।
काल्यार्हणाविळम्बासहना अधिकारिणोऽप्युपागच्छन्॥ **69**॥

घणघणरणितज्ञापितदनुजद्वेषणनिषेवणावसरा।
क्षणविश्लिष्टा घण्टा न ज्ञायेताञ्जनाचले केन॥ **70**॥

हरिभवने मिळितेष्वथ विस्मयशोकाकुलेषु लोकेषु।
वेङ्कटनायककोशागाराध्यक्षो यतिरवादीत्॥ **71**॥

अलमलमावेगेनानन्तगिरीन्द्रस्य नायकेनाऽहम्।
करुणागुरुणा प्रभुणा स्वप्ने हरिणा निशीत्थमनुशिष्टः॥ **72**॥

घण्टोदेष्यति भूमौ श्रीमन्निगमान्तदेशिकाकारा।
साऽनन्तसूरिगृहिणीगर्भपुटीं निशि मयैव नीतेति॥ **73**॥

शङ्किषत मा भवन्तो वेङ्कटनेता हि चित्रसङ्कल्पः।
काञ्च्या एत्याऽत्राऽऽस्तेऽनन्तार्योऽप्युत्सवालुलोकिषया॥ **74** ॥

इत्युक्ते यतिना ते चिन्तापेता हरेः परीवाराः।
ईचिक्षिषवोऽनन्ताचार्यं प्रापुस्तदीयमावासम्॥ **75** ॥

औषसिकं कर्म गुरुर्निखिलं निर्माय तां कृपामेव।
सन्ततमन्तर्ध्यायन्नानन्दाश्रूण्यवर्तयन्नितराम्॥ **76** ॥

प्राञ्जलयस्सर्वजनाः मिळिता गुरुणा निशम्य वृत्तान्तम्।
अश्लाघिषत गुरोस्तां भक्तिं केचित्परे हरिकृपां ताम्॥ **77** ॥

अधिकारिणोऽथ मुदिता विस्मितचित्ता अयासिषुः स्वगृहान्।
उत्सवमनुभूय गुरुर्दयितासहितः पुरीं काञ्चीम्॥ **78** ॥

उपनिषदामुल्लासं सत्पथमणिदीपमाश्रयं सुधियाम्।
गुरुगृहिणी गर्भमधात् कौतस्कुतदावपावकं कमपि॥ **79** ॥

दधती कुक्षौ जगतीभूषणमतुलं गुणोज्ज्वलं सुदती।
अत्यजदितराभरणान्याहारेऽपि क्रमेण मन्दरुचिः॥ **80** ॥

अभ्यस्यन्निव नेतुं वैशद्यं तामकृत्रिमां वाणीम्।
प्रथमं जननीवदनं गर्भोऽनैषीदतीव वैशद्यम्॥ **81** ॥

आचम्य तमो लोकं सत्त्वोद्रिक्तं चिकीर्षुरेष शिशुः।
चूषणसौकर्यार्थं नैल्यच्छलतः कुचाग्रमनयत्तत्॥ **82** ॥

वक्ष्यन् हरिपारम्यं सेहे नायं वलित्रितयम्।
तिर्यक्पुण्ड्राकारं स्वावासस्योदरस्य मुखभागे॥ **83** ॥

अन्तर्वत्नी येते भक्षयितुं शुद्धमृत्तिकाखण्डम्।
उदरे सद्गुरुरवलत पुण्ड्रप्राप्त्युत्थयेव मुदा॥ **84** ॥

सीमन्तोन्नयनादीन्यतनीद्गुरुरेष दयितायाः।
चत्वारिंशत्संस्कृतिविधिसंवेदी यथाकालम्॥ **85** ॥

गुरुभाविनं वहन्ती गर्भं प्रेयस्यनन्तगुरोः।
निष्कुटमल्लीवल्ल्याः कुसुमावचयेऽप्यशक्नुवत्यासीत्॥ **86** ॥

फलभरविनमच्छालिं वसुधां क्षेत्रीव भूरिकृषितान्तः।
प्रसवोन्मुखीं प्रियां स्वां पश्यन् स गुरुर्भृशमनन्दीत्॥ **87** ॥

सप्तत्यधिकत्रिशतीसहितेषु कलेश्चतुस्सहस्रेषु।
वर्षेषु प्रतियातेष्वन्त्ये तत्रैव विभवाख्ये॥ **88** ॥

मासि नभस्ये महिते श्रवणे तारे श्रियः पत्युः।
घण्टानन्तार्यगुरोः पुत्राकारेण भुव्यवातारीत्॥ **89** ॥

कौस्तुभ इव कलशाब्धेः हरिणा हृदयेन सर्वदा धार्यः।
सर्वार्थसिद्धितोषितसुमनोबृन्दश्च कल्पवृक्ष इव॥ **90** ॥

सच्छास्त्रादिव बोधश्चन्द्रादिव सर्वलोकसन्तोषः।
स्वच्छस्वच्छविरुदगात् पुत्रोऽनन्तार्यधीमतः कृतिनः॥ **91** ॥

इष्टान् कतिपयशिष्टान् हृष्टमना मन्दिरं समानीय।
अथ जातकर्म चक्रेऽनन्ताचार्यः शिशोर्यथाविभवम्॥ **92** ॥

कमलाविलासिहृदयोल्लासकरं भूरि कर्म निर्मातुम्।
अरणेर्मथितमिवाऽनलमात्मजमवलोकयन् मुमुदे॥ **93** ॥

सुतरूपधेयमतुलं दृष्ट्वा विदधेऽस्य नामधेयमसौ।
एकादशेऽह्नि तातो विष्णोर्नाम्नैव वेङ्कटेश इति॥ **94** ॥

कर्णान्तायतनेत्रं शशिनिभवक्त्रं समुन्नतस्कन्धम्।
बहुपुण्यविभवलब्धं गुरुरपुषत्तं सुतं प्रयत्नेन॥ **95** ॥

भूगोळस्य तु निर्णयमचिराङ्घ्रिभ्भो विधास्यन् सः।
अवनाववाङ्मुखस्स्सन् शिश्ये प्रष्टुं तदीयमिव तत्त्वम् ॥ **96** ॥

युक्तिभिरीश्वरयुगळं सूक्तिसुधा तस्य साधयिष्यन्ती।
तेने वदने रदयुगकपटात् सुखबोधसाधनाभिनयम् ॥ **97** ॥

चित्रकसुन्दरवदनं बालं लम्बालकं समालोक्य।
जननी मुमुदे नितरां नन्दकुमारं यशोदेव ॥ **98** ॥

विगळल्लाली बालः शिञ्जन्मञ्जीरमाट जानुभ्याम्।
पितुरग्रतो विधेरिव हंसश्चञ्चूगृहीतबिसनाळः ॥ **99** ॥

उत्तिष्ठन्तं दृष्ट्वा मणिडोलाशृङ्खलां समालम्ब्य।
कृत्वा पुरतः काञ्चित् यष्टिं तमचीचरन्मुदा जननी ॥ **100** ॥

यतिपतिफणितिलताया अचिरात्संवर्धयिष्यमाणायाः।
व्यद्युतदुपघ्न इव स क्रमितुं बालावलम्बितो दण्डः ॥ **101** ॥

श्रुत्वाऽर्भकस्य पितरौ कळभाषणमित्यमंसाताम्।
अमरा अमृतममोक्ष्यन् यदि ते तनयानलप्स्यन्त ॥ **102** ॥

नयनानन्दनमनघं नन्दनमेनं त्रिहायनं दृष्ट्वा।
तातोऽनन्तसुधीन्द्रो निर्वर्तयति स्म चौळविधिम् ॥ **103** ॥

विरचय्य सुन्दराङ्गं मृन्मयवरदं क्रमेण बालोऽयम्।
आर्चीदनमदहृष्यत् साकं सवयोभिरुत्सवं कृत्वा ॥ **104** ॥

असहाय एव बालः प्रास्थित करिशैलनाथसेवायै।
निकटेऽतिष्ठत् कुतुकी विदुषां चलितेषु शास्त्रवादेषु ॥ **105** ॥

योगिभिरपि दुर्लभया सद्वासनयाऽनया विलक्षणया।
भगवति भक्त्या ध्रुवया बालस्याऽस्य ध्रुवस्येव ॥ **106** ॥

नयनासेचनकश्रीजुषा च वपुषात्युदारेण।
श्रुतिसुखवर्षिण्याऽमृतधिक्कारिण्या च वचनधोरण्या ॥ **107** ॥

धिषणन्यक्कारिण्या मतिभङ्ग्या चानुमिम्यिरे धीराः।
कोऽपि महान् सुकृतनिधेः पुत्रोऽनन्तार्यधीमतोऽयमिति ॥ **108** ॥

भुवनस्य भाग्यभूम्ना सम्भूतस्यास्य भूरिगुणभाजः।
भूयासुर्भूयांसि श्रेयांसीत्याशिषा च युयुजुस्ते ॥ **109** ॥

अथ पञ्चवर्षदेश्यः शितबुद्धिः शिक्षते स्म वर्णानि।
सकृदुपदेशश्रवणात् ज्ञात्वा तत्तत् सतीर्थ्यमशिशिक्षत् ॥ **110** ॥

वात्स्यस्यैष कदाचिद्वरदाचार्यस्य सन्निधिमयासीत्।
निगमशिरः परिचेतुं मातुर्भ्रात्रा प्रतिष्ठमानेन ॥ **111** ॥

युक्तिभिरल्पमनल्पं गुरुतरमर्थं तथा तनीयांसम्।
व्यातन्वानैश्शिष्यैर्वरदाचार्यं वृतं मुदानंसीत् ॥ **112** ॥

आचार्यानाश्रीपति साञ्जलि सहभक्ति सम्यगानम्य।
शारीरकभाष्यार्थान् आरप्सत ते विचारयितुम् ॥ **113** ॥

विशदद्वादशपुण्ड्रीवसनेन च्छात्रसत्कदम्बेन।
वलयित आचार्योऽसौ परिवेषी चन्द्रमा इव रराजे ॥ **114** ॥

मृडचूडातटनानटदमरधुनीभङ्गगर्वभङ्गकृता।
बालो विसिष्मियेऽसौ वरदाचार्यस्य वाग्विलासेन ॥ **115** ॥

अध्यापयन् स इत्थं समधिक्षत कुत्रचिद्विषये।
तद्वाक् क्षणमस्तभ्नात् गङ्गालहरीव जह्नुसत्रान्ते ॥ **116** ॥

अदसीयेषु सुमेधस्स्वपि सच्छात्रेषु सन्दिहानेषु।
बालोऽपि वेङ्कटेशो भावाख्यानेन संशयमहार्षीत् ॥ **117** ॥

आचार्योऽचित्रीयत सहशिष्योऽमुष्य शेमुष्या।
अघ्रासीन्मूर्धानं सादरमेनं स्वमङ्कमारोप्य॥ **118** ॥

इदमीयं किल मातुलमाहूयासावथाऽदिक्षत्।
वर्त्स्यत्यमुमाश्रित्य श्रीमद्रामानुजार्यसिद्धान्तः॥ **119** ॥

निस्सामान्यविकासिन्यदसीया शेमुषी कृषीष्ट सताम्।
इष्टतमं निगमागमसारोद्धारं प्रहृष्यति मनो मे॥ **120** ॥

त्वद्भागिनेयमेनं शास्त्रविचारांस्तु भूरि बोधयितुम्।
दुष्परिहरया जरया व्याप्तत्वान्नाहमीशिष्ये॥ **121** ॥

अवतंसाभामददात् कर्णोपान्तं जरा पलितयन्ती।
अळकांस्ततः कतिपयान् मल्लीमालातुलामनयत्॥ **122** ॥

इत्थमुपच्छन्द्य जरा सर्वाङ्गीणाऽधुना जाता।
गळितं तादृग्धैर्यं मत्यां च मूर्त्यां विघटिता पटुता॥ **123** ॥

यत्नात् स्मृतिमानीतोऽप्यर्थो भूयस्तथा परिचितोऽपि।
न स्फुरति विवक्षायां स्फुरितोऽपि किलाऽन्यथा भवति॥ **124** ॥

निपतितपतत्पतिष्यद्रदनैः विरळीकृतान्तरं वदनम्।
अस्फुटवर्णैर्विकलां फूत्कारमयीं गिरं प्रकाशयति॥ **125** ॥

यष्टिं धृत्वा चरता यत्र तु देशे निधित्स्यते पादः।
वेपथुविसंस्थुळत्वात् तत्र मया शक्यते न निक्षेप्तुम्॥ **126** ॥

आतपशुष्कं बदरीफलमिव वलिनं शरीरमास्माकम्।
काङ्क्षति बहुशुश्रूषां वयसि ह्यस्मिन् तृतीयस्मिन्॥ **127** ॥

विश्लथ सन्धिबन्धामस्वाधीनाखिलावयवाम्।
अपचीयमानकरणां वर्षीयस्तामनौषधां धिग्धिक्॥ **128** ॥

उपदिश तत्त्वं तत्त्वं सत्वोद्रिक्ताय सादरममुष्मै।
आचार्यस्य कृपायामायतते शिष्यवैदुषी यस्मात्॥ **129** ॥

इत्युक्त्वा वरदार्यो बालं निखिलार्थवेदिता भूयात्।
जीव्यात् पुरुषायुषमित्यनुगृह्य प्रेषयामास॥ **130** ॥

अथ वर्षे गर्भाष्टम उपनीतं भागिनेयमात्रेयः।
आरब्धाध्यापयितुं निगमं रामानुजाचार्यः॥ **131** ॥

सकृदध्यापितमंशं स परेद्यव्यप्युपाक्रमत।
ह्यः कथितोऽवगतोऽंशः परमुपदिशतेति बाल आर्तिथत॥ **132** ॥

अथ कठिनान् प्रश्नानप्युत्तरयन्तं वचोऽनुरोधेन।
अध्यापिपदतिमात्रं विस्मितचित्तस्स तस्य नैपुण्या॥ **133** ॥

अम्नासीदाम्नायान् अङ्गन्यध्यैष्ट तर्कमाचकलत्।
नयजालमार्मिकोऽसौ मीमांसां पूर्विकामपिबत्॥ **134** ॥

तापाद्यान् स्मृतिमात्रात्पापहरांश्च पञ्च संस्कारान्।
अलभत मातुलनिकटादकलयदखिलान् रहस्यार्थान्॥ **135** ॥

सरळां गभीरभावां मञ्जुळपदजातगुम्भिलाममलाम्।
श्रीमच्छठरिपुकलितां तां किल शाखामधिजगेऽसौ॥ **136** ॥

विहरणभूमौ विद्युल्लसितोरस्कस्य कालजलदस्य।
श्रुतिमकुटीगिरिशिखरे प्रननर्त रसस्य सन्तृप्तः॥ **137** ॥

शय्यारीतिरसज्ञः सम्यगलङ्कारवृत्तिगुणदोषान्।
जानन् सूक्तिषु चतुरः कवितां स्वयमागतामुपायंस्त॥ **138** ॥

साङ्ख्यं योगं भास्करयादवगुरुभट्टबुद्धसिद्धान्तम्।
जैनं शैवं शाङ्करमखिलमजानीत वेदचूडार्यः॥ **139** ॥

स्मृत्यर्थान्निरणैषीत् सोपपुराणान्यवेत्पुराणानि।
सात्त्विकराजसतामसभेदैर्भिन्नानि सेतिहासानि॥ **140** ॥

सूक्तिसुधा निष्क्रमयन्नाचम्य द्रविडभाषाब्धिम्।
अत्यशयिष्ट किलासावम्बुधिकुक्षिम्भरिं तमृषिवर्यम्॥ **141** ॥

सकलाभिः स कलाभिः परिपूर्णो विंशतिवयस्कः।
आनन्दयदाचार्यं विद्यानिलयं सरित्पतिमिवेन्दुः॥ **142** ॥

दोषोदयेन रहितैस्तोषितविबुधैस्सदाऽपरिच्छिन्नैः।
अस्य हि कलाकलापैः मन्ये चन्द्रो मलीमसहृदासीत्॥ **143** ॥

स्थाने व्यपदेशार्हः महदपचारात्कळङ्कीति।
हरिणधृतिर्न निदानं पूर्णोऽसौ याति सङ्क्षयं यस्मात्॥ **144** ॥

गुरुकुलनिलयस्सकलास्वित्थं विद्यासु कौशल्यम्।
उपलभ्य शोभमानो गुरुणा तेनान्वमन्यत गृहाय॥ **145** ॥

शुद्धान्ववायजातां सौशील्याद्यैश्च सद्गुणैर्भान्तीम्।
विद्यामिव निरवद्यां कन्यामुदवोढ मङ्गाख्याम्॥ **146** ॥

अनसूयासहितोऽत्रिः ब्रह्मसुतोऽरुन्धतीसमेत इव।
गार्हस्थ्यमन्वतिष्ठत् विधिवद्गुरुवर्य एष सहजानिः॥ **147** ॥

श्रीरामानुजसूरिः नैपुणमालोक्य भागिनेयीयम्।
हृष्ट उपादिक्षदथ प्रेम्णा गारुत्मतं मन्त्रम्॥ **148** ॥

## अहीन्द्रपुरक्षेत्र काण्डः

प्रीणयितुं विष्णुरथं वेदमयं तस्य मन्त्रमावर्त्य।
शुभकर्ममर्मवेदी वेदान्तार्यो ह्यहीन्द्रपुरमाप॥ **149** ॥

यन्नाम वैभवात् स्वात् पक्षीन्द्रं सन्निधापयितुमीष्टे।
श्रीमानाद्यः पुरुषो यत्रेन्धे देवनायकाभिधया॥ **150**॥

श्रीदेवनायकपदाम्भोरुह भक्ताग्रहाररमणीयम्।
यन्नगरं किल परितो गरुडनदीमन्दमारुतश्चरति॥ **151**॥

गजराजाभयदायी प्रशमधनैस्सुग्रहो झटिति।
औषधगिरिमधितिष्ठति यत्राद्भुतकेसरी प्रज्ञः॥ **152**॥

अस्नासीद्गरुडनदीमेत्यासावाह्निकानि निरमासीत्।
श्रीदेवनायकस्य च पादाम्भोजे अथो अवन्दिष्ट॥ **153**॥

औषधगिरिमधिरूढः प्रह्लादाह्लादकारणं देवम्।
प्राणंसीत् तं देशं द्वेधापि विविक्तमज्ञासीत्॥ **154**॥

तत्रैव पर्वताग्रे पतगेन्द्रं सन्तुतोषयिषुरेषः।
रम्यं स्थलमधितष्ठावश्वत्थानोकहच्छाये॥ **155**॥

उदकमुपस्पृश्य गुरुः प्राणानायम्य पक्षिराजमनाः।
मातुलदत्तं मन्त्रं शनकैरावर्तयामास॥ **156**॥

पक्षानिलसन्तोषितसुमुखोरगभूषणः सुपर्णोऽथ।
श्रीरामानुजदर्शनवृद्धौ कुतुकी पुरोऽस्य संन्यधित॥ **157**॥

कार्तस्वरभूमीधरमिव गम्भीराकृतिं समुत्कीर्णम्।
बालारुणसच्छायं दययाऽधिकया पुरस्स्थल उदीतम्॥ **158**॥

भुजगस्फटास्थपुटितोत्कुटिलतमभ्रूकुटिविटङ्कम्।
दूरेऽत्यार्तजनावनपरवशभगवन्मनोऽनुकूलजवम्॥ **159**॥

वज्रायुधधाराकिणनिर्धारितपौरुषं महोरस्कम्।
चन्दनचर्चितवपुषं प्रेम्णा रुद्रासुकीर्तिभ्याम्॥ **160**॥

ध्वजकलशमत्स्यमुख्यैः रेखाकारैः पदाब्जगतैः।
सम्मुद्रितप्रकोष्ठं भुजशिर आरोहता मुकुन्देन॥ **161**॥

अङ्गदकुण्डलमालाकाञ्चीवलयात्मनां फणीन्द्राणाम्।
भासुरफणामणिच्छविनीराजनदर्शनीयतमम्॥ **162**॥

स्कन्धस्थितदनुजद्विड्दीताम्बरवान्ततन्तुसन्दोहैः।
सावर्ण्याद्दुर्लक्षैर्द्राघिष्ठतनूरुहं निगमरूपम्॥ **163**॥

त्रिवृता गायत्रेण स्तोमेन च वामदेव्यसाम्ना च।
मस्तकिनं दृङ्मन्तं तथात्मवन्तं शरीरवन्तं च॥ **164**॥

यज्ञायज्ञियपुच्छं यं वक्ति बृहद्रथन्तरपतत्रम्।
धिष्ण्यशफं यजुराख्यं च्छन्दोऽङ्गं च श्रुतिस्सुपर्ण इति॥ **165**॥

विष्णुपदादवतीर्णं विष्णुपदन्यासधन्यतमम्।
विष्णुरथं तं श्रीमान् कवितार्किककेसरी गुरुरपश्यत्॥ **166**॥

प्रणिपातानातेने प्रणिधानं सद्य एव च निवर्त्य।
विनतानन्दन विनतानन्दन पाहीति चार्तथत भक्त्या॥ **167**॥

परिशुद्धिं परभक्तिं संवीक्ष्य ब्रह्मवर्चसं च गुरोः।
ज्ञानानुष्ठाने अपि पक्षीन्द्रो विस्मयमभाक्षीत्॥ **168**॥

अधिकं प्रसेदिवांसं परमपि सुलभं पतङ्गनेतारम्।
दर्शं दर्शमविन्दत्परमानन्दं गुरुश्च विस्मेरः॥ **169**॥

श्रीमद्रामानुजमुनिसिद्धान्तं स्थापयेति तार्क्ष्योऽस्मै।
मन्त्रं वाजिमुखस्य प्रादान्मूर्तिं च परितोषात्॥ **170**॥

सदयं कटाक्षयित्वा पतगश्रेष्ठः प्रतिष्ठमानोऽथ।
विनतं वेङ्कटनाथं परिमृश्याश्लिष्य चोड्डिड्ये॥ **171**॥

निरवद्यां परविद्यां बाह्यानुत्सार्य तोषयितुमस्य।
युधि सीताजानेरिव तदङ्गसङ्गादवर्धतोत्साहः॥ **172** ॥

तस्मिन्नेवोद्देशे तुरगग्रीवं च तोषयितुमैच्छत्।
सौवर्णशकललाञ्छितमधिगतकनकस्थलं विजह्यात्किम्॥ **173** ॥

मणिमयहयमुखमूर्तिं पुरतो भद्रासने प्रतिष्ठाप्य।
उपचारैः षोडशभिर्भक्त्या समपूपुजद् गुरुश्रेष्ठः॥ **174** ॥

श्रीमान् फलाभिलाषाकलुषितहृदयो मुखाम्बुजोल्लासम्।
अभिलाषुकः स हि विभोर्दध्यौ हयवक्त्रनामकं धाम॥ **175** ॥

शुद्धस्फटिकाकारः सकलकलासारशेवधिरनन्तः।
अन्तर्ध्वान्तनिबर्हणचणया चिन्मुद्रया श्रिताह्लादी॥ **176** ॥

तृष्यच्चकोरहर्षी विशदाभिस्सृत्वरीभिराभाभिः।
पुरतस्तपस्यतोऽस्य प्रादुर्भूतो हरिस्तुरगरूपी॥ **177** ॥

नाशितदितिसुतमदया श्रुतिशतसौरभ्यसम्भृतया।
प्रणतश्रवणानन्दं दुहानया हेषयोल्लसितम्॥ **178** ॥

तापत्रयनिर्धूननसिद्धौषध्या कटाक्षलेशेन।
दळयन्तमान्तरतमः कन्दळयन्तं च सत्त्वलताम्॥ **179** ॥

शारदपार्वणराकानायकधिक्कारिकान्तिकमनीयम्।
विज्ञानराशिमुदितं वीक्ष्य ववन्दे गुरुर्विलक्षमनाः॥ **180** ॥

स्वस्मिन्नुदितप्रीतिं गद्गदसंरुध्यमाननुतिरीतिम्।
श्रुतिसङ्कटहरफणितिं वेङ्कटनाथं हयास्य आश्वास्य॥ **181** ॥

अमृतनिधानं कलशाम्भोनिधिडिण्डीरवन्मधुरम्।
लालारूपं वदनाम्भोरुहमकरन्दमादयद्गुरुणा॥ **182** ॥

हयमुखतेजोबृंहितविचित्रशक्तेर्हि गुरुजनाग्रण्यः।
अप्रतिबद्धप्रसरं ज्ञानं परिशुद्धधर्मणो व्यरुचत्॥ **183** ॥

अभणीत् स्वैरं पाणिनिसिद्धान्तानक्वणीच्च काणादे।
अगदीद्धरिपारम्यं श्रियश्च विभुतामतिष्ठिपद्धि गुरुः॥ **184** ॥

सौपर्णीं पञ्चाशतमागमसारार्थजालजटिलतमाम्।
अनुभवपरिवाहमयीं हयाननस्य स्तुतिं च गुरुरकरोत्॥ **185** ॥

प्रत्यक्षीकुरुते स्म श्रीशं तस्यौपवाह्यमपि यत्र।
तत्रैवाहीन्द्रपुरे कञ्चित्कालं गुरुरवात्सीत्॥ **186** ॥

श्रीदेवनाथपञ्चाशतमातेनेऽग्रणीः कृतज्ञानाम्।
सुन्दरमच्युतशतकं प्राकृतभाषामयं निरमिमीत॥ **187** ॥

कन्तुकगाथाडोलागाथानवरत्नमालिकाप्रभृतीन्।
अग्रथ्नाद्ग्रन्थान्नव भाषां श्रित्वा ह्यगस्तीयाम्॥ **188** ॥

सद्गुणशोभाकारणमहर्निशं वर्धमानमकळङ्कम्।
अवकाशापर्याप्तेः ब्रह्माण्डपुटीं दिदारयिषुम्॥ **189** ॥

त्रय्यन्तार्यगुरूत्तमकीर्तिसुधांशुं न सेहिरे तत्र।
अष्टादशमतभङ्गीरैकैकश्येन संश्रिता बहवः॥ **190** ॥

विवदन्ते स्म गुरूत्तमसन्निधिमभ्येत्य पण्डितंमन्याः।
न हि शेकुः निगमादिप्रमाणशतवर्षिणः पुरः स्थातुम्॥ **191** ॥

तृणयितुमद्रिं तृणमपि शैलयितुं युक्तिभिः समर्थोऽपि।
न स्वैरं व्याहार्षीत् वेङ्कटनाथः प्रमाणशरणः सन्॥ **192** ॥

आशीर्हीनाः सर्पा इव ते सर्वे दमितदर्पाः।
आर्यप्रसदनहेतोर्नत्वा नुत्वा च मन्दिराण्यभजन्॥ **193** ॥

इत्थं विजयी सन्नपि नाकत्थत शेमुषीं स्वकीयां सः।
अस्तु तदन्तःकरणं हन्ताऽहन्तालवोऽपि नाऽस्प्राक्षीत् ॥ 194 ॥

द्रविडामरसूक्तिमयं परमतभङ्गप्रबन्धमारचयत्।
स्तोकज्ञानानपि यः प्राज्ञीकुरुतेऽन्यदीयमतभङ्गे ॥ 195 ॥

हृद्यं रघुपतिगद्यं व्यधित च गोपालविंशतिं सरळाम्।
सुधियः पुळकितवपुषो घोषं घोषं स्तुवन्ति ये अनिशम् ॥ 196 ॥

दुर्वादिनः प्रलीना अपि तस्मात्कौशिका इवार्यम्णः।
अभिभवितुं गुरुवर्यं प्राहिण्वन् भित्तिकर्मकरमेकम् ॥ 197 ॥

प्रबलः किल पलगण्डः श्रीमन्निगमान्तदेशिकमुपेत्य।
सर्वेष्वपि तन्त्रेषु स्वातन्त्र्यं ते हि घुष्यते सर्वैः ॥ 198 ॥

कूपत्रातृणि कुट्टिमकर्मणि यदि सर्वतन्त्रघटके माम्।
विजयेथा निपुणिम्ना स्थाने स्वाधीनसर्वतन्त्र इति ॥ 199 ॥

द्विस्त्रिश्चतुरिति तस्योद्घोषान् गुरुवर्य आकर्ण्य।
गर्वं निर्वापयितुं सङ्कल्पयति स्म तस्य दृप्तस्य ॥ 200 ॥

त्रय्यन्तैकाग्रधियः प्रहिबन्धनकर्मपरिचयः कुत्र।
अथवा सर्वपथीना धिषणा नैव प्रतीक्षतेऽभ्यासम् ॥ 201 ॥

दत्त्वा गुरुरथ पक्वाः संमृष्टा इष्टकास्तस्मै।
अयतत निष्कुटवर्तिनमन्धुं बन्धुं समं मदान्धेन ॥ 202 ॥

एकं पार्श्वमबध्नात्पलगण्डः स प्रयत्नेन।
आर्यस्त्वन्यत्पार्श्वं निष्पर्यालोचनमभान्त्सीत् ॥ 203 ॥

पार्श्वं यदिष्टकचितं तेन वितेनेऽतितुष्टेन।
दृढबन्धं वृत्ततरं गुरुपार्श्वं भासते तदतिशायि ॥ 204 ॥

अधरीकृतनिजपार्श्वामथ रीतिं कर्मणः स वीक्ष्य गुरोः।
कर्मकरो विस्मेरो निर्ममगुरुपादपङ्कजे अनमत्॥ **205** ॥

एनस एतस्य विभो नाहङ्कारादहं कर्ता।
परबोधनतो रचितं भगवन् क्षमतां भवानिति जगाद॥ **206** ॥

कूपः किल विमलापः स्पष्टीकृतकर्तृयुगळीकः।
उत्कर्षितगुरुनाथः फणिपतिनगरे विराजतेऽद्यापि॥ **207** ॥

दिशि पश्चिमोत्तरस्यां या फणिनगरस्य भाति गोपपुरी।
गत्वा तां गुरुवर्यो भक्तिभराद्देहळीशमस्तावीत्॥ **208** ॥

तन्मङ्गळमाशास्य स्तोत्रं कृत्वा बुधश्रवःपात्रम्।
पुनरासेवितुकामः करिगिरिपतिमागमत्काञ्चीम्॥ **209** ॥

## सत्यव्रत क्षेत्र काण्डः

स्नात्वाऽनन्तसरस्यां वसने स्वच्छे वसानोऽथ।
धृत्वा पुण्ड्राण्यस्तौत् पङ्कजनयनं पतङ्गमण्डलगम्॥ **210** ॥

पद्माक्षमालिकाभिर्विलसद्वक्षा उपेत्य देवगृहान्।
सेवाक्रमेण नत्वा वरदं सदनं ययौ सपरिवारः॥ **211** ॥

स्वागतहृष्टाः साधव आचार्यं पर्यवारयन् बहवः।
समतोषयत् स उचितैर्योगक्षेमानुयोगैस्तान्॥ **212** ॥

भर्म तृणायाऽपि गुरुर्न मन्यमानो यथाभिरुचि।
पितरन् हितपरतायां व्यतरच्छास्त्राणि शिष्येभ्यः॥ **213** ॥

नत्वा गुरुपदकमले तस्य दयासान्द्रदृष्टिपातेन।
षड्दर्शन्यां नैपुणमपि मन्दाः साध्वविन्दन्त॥ **214** ॥

पुष्प्यन्मल्लीपरिमळसहकृतसहकारपल्लवैर्मृदुलैः।
कोकिलकुलातिथेयीनिपुणः शनकैर्वसन्त आविरभूत्॥ **215**॥

रतिरमणीयप्रहरणनिशानमाज्ञापयत्किमु वसन्तः।
अनलज्वालालीलामलभन्त रसालकिसलानि॥ **216**॥

पाटीरशैलपवनश्चलयन् फुल्लन्ति कमलानि।
चारान् विस्मृतपूर्वान् शनकैः शनकैः परिचिकाय॥ **217**॥

चिरविनिवृत्तपिपासा माकन्दमरन्दधाराभिः।
निनदैर्व्यवृषत मधुरैरान्तरमिन्दिन्दिराः प्रमदम्॥ **218**॥

अनिलचलिताः समुकुळाः किंशुकवृक्षस्य पत्रळाः शाखाः।
वागुरिकाः शुकबुद्ध्या दूराद्दृष्ट्वा मुदं परामापुः॥ **219**॥

युवतिमनोलक्ष्यभिदे मदनायाशोकशाखिनोऽदिषत।
प्रत्यग्रान् बाणगणांस्तासां पादाहतीः स्मरन्त इव॥ **220**॥

अहसीदिव कुड्मलिता कुन्दलता वीक्ष्य कुप्यतो वृक्षान्।
लब्ध्वापि हन्त दिष्ट्या चरणसरोजाहतिं रसिकमान्याम्॥ **221**॥

मानवतीमानसतो मानधनं मीनकेतने हरति।
भागार्थीवोद्दीपक इन्दुश्च करप्रसर्पणमकार्षीत्॥ **222**॥

भित्त्वा तमोयवनिकां पद्मिन्यग्रे प्रसारितकराग्रम्।
तत्परिभूतं तारारमणं दृष्ट्वा जहास कैरविणी॥ **223**॥

नभसा सञ्चरमाणामळिमालामध्वगा अमन्यन्त।
मलयाद्रिरळमयीं ज्यां मरुता मदनाय दातुमानीताम्॥ **224**॥

उपदेष्टरि मधुपेभ्यो मलीमसेभ्यः सपीतिकेळिरुचेः।
कामसखे तत्रायानामोदं सुमनसश्चित्रम्॥ **225**॥

भवतापितनतजनतादुरिताहृतये कृतावतारस्य।
प्रावर्तत वासन्तिकमहोत्सवो वरदराजस्य॥ **226** ॥

श्रीपतिसेवारसिकैरहमहमिकया समागतैः सद्भिः।
नानादेश्यैः काञ्चीनगरी निबिरीसतामाप॥ **227** ॥

नगरं वरददयोदयसंस्मृतिजैः संमदाश्रुभिः सुधियाम्।
विरजस्कमिति स्थाने चरणरजोभिस्तथेति चित्रमिदम्॥ **228** ॥

आनकभेरीढक्काध्वानोद्बुद्धोत्सवारम्भैः।
तुम्बुरुनारदपूर्वैरमरैर्गगनाजिरे समाजग्मे॥ **229** ॥

स्वं स्वमहम्पूर्विकया सदनं वरदोत्सवारम्भे।
रम्भास्तम्भैस्तोरणमाल्यैरपि नागरा अलञ्चक्रुः॥ **230** ॥

चन्दनसङ्गात्कङ्कणकान्तिच्छुरणाच्च कनकरसशोभैः।
सलिलैः सलीलमबला सिक्त्वा रथ्यां ततान रङ्गलताम्॥ **231** ॥

सामिकृतां रङ्गलतां पूर्णेत्यमुचद्विसारिहाररुचा।
तादृशवृत्त्यनुवृत्त्यै कदळीमकरन्दबिन्दुभिर्येते॥ **232** ॥

पट्टाञ्चलानि वसनान्यवसत केचित्परे दुकूलानि।
नानाभरणान्यबिभरुरखिलाः श्रीवरदराजसेवायै॥ **233** ॥

मानयितुं जामातरमुत्सवकाले सुतां च लालयितुम्।
प्राप्तः कलशाम्बुधिरिव काञ्च्यां लोको व्यलोकि संमिळितः॥ **234** ॥

अनुगेहमेत्य दास्यति चतुरोऽर्थान्नैगमान्तपरिमृग्यः।
इति मत्वेव निषद्या हृद्या अनुवीथि तस्तरिरे॥ **235** ॥

संनह्यतोऽथ वणिजो दृष्ट्वासौ योगिबृन्दनुतकीर्तिः।
ध्रुवमर्थान्सकलानपि समकल्पयदञ्जलिक्रय्यान्॥ **236** ॥

दीनावनाय वरदो भ्राम्येत्सर्वां महीमिति गजाद्रिः।
क्षणविश्लेषासहनो गजराजव्याजतो जगाम पुरः॥ 237 ॥

शठरिपुशाखासारासारैः सरसैः पुरस्सराः शौरेः।
शिष्टा विप्रा रसिक श्रवसी आनन्दयामासुः॥ 238 ॥

अम्बरचरतुम्बुरुमुखसुरगायकवाद्यमाधुरीसुहिताः।
वादननाटनमपि च प्रशशंसुर्वरदवाद्यकाराणाम्॥ 239 ॥

नयनानन्दमतानीत्काञ्च्यां द्राघीयसीषु रथ्यासु।
करिगिरिपतिरधरीकृतमदकलकलभः सलीलयातेन॥ 240 ॥

सौन्दर्यसारनिलयं सकलालङ्कारचारुताहेतुम्।
आसेव्य श्रीमन्तं वरदं लोकः प्रमोदमापेदे॥ 241 ॥

नलिनासनेन सवनावनसन्तुष्टेन किं शरण्याय।
दत्तौ हंसाविति तद्वालव्यजने व्यतर्कयन्सुधियः॥ 242 ॥

अन्तरिते सुरबृन्दैर्गगने सेवार्थमवतीर्णौ।
सूर्याचन्द्रमसाविव विशदे छत्रे विराजेते॥ 243 ॥

भाति पतङ्गारूढो विधुरधिधरणीति वाचमाकर्ण्य।
सौधगतानां सुदृशां कुतुकादवतेरतुस्तौ किम्॥ 244 ॥

विनतासुतगळभूषा धवळा विभुपादसङ्गिनी माला।
श्रितजनदुरितं त्वरितं हर्तुं गङ्गा पुनश्च सृष्टेव॥ 245 ॥

केवललीलालोलैर्बालैरज्ञातवरदमाहात्म्यैः।
वरदं सेवितुमलसौ पितरौ सदनादकृष्येताम्॥ 246 ॥

यं कञ्चित्तनुतरमपि रक्षोपायं प्रतीक्षमाणेन।
पुत्रत्वं सार्थयितुं तेषां वरदेन समकल्पि॥ 247 ॥

उन्मस्तकसेवारसविस्मृतविषयान्तरा लोकाः।
जहसुर्दध्वनुराट्टुस्तुष्टुवुराशिश्लिषुर्जगुर्ननृतुः ॥ **248** ॥

चन्दनरूषितवपुषः सर्वे मल्लीसरस्फुरत्कैश्याः।
उत्सवसमये तस्मिन्नैकोऽप्यानन्दतुन्दिलो नासीत् ॥ **249** ॥

वृद्धस्य मूर्ध्नि पलिते भ्रमरैर्मल्लीभ्रमेण परिपेते।
मत्वा कैश्यं मालां बन्धुं तत्र प्रचक्रमे कश्चित् ॥ **250** ॥

वैदेशिकसाधुजनानुत्सवसेवार्थमञ्चतः काञ्चीम्।
मृष्टान्नपानदानैरुपचेरुः प्रीतितस्तदा बहवः ॥ **251** ॥

धिषणाधिक्कृतधिषणैः शिष्यैः साकं महोत्सवे तस्मिन्।
श्रीमानन्वव्राजीत्कवितार्किककेसरी वरदम् ॥ **252** ॥

करुणादिमगुणमणिगणविवरणनिपुणाश्चिरन्तनीः फणितीः।
श्रावंश्रावं पुरतस्तासां लक्ष्यं च वीक्ष्य न ततर्प ॥ **253** ॥

पद्मासखपदपङ्कजलीनमना नान्यदबुधदयम्।
रोमाञ्चितमूर्तिरथो अपणिष्ट सगद्गदं साश्रुः ॥ **254** ॥

भक्त्या वरदं स्तुत्वा तत्सेवार्थे समागतैर्बहुभिः।
समगत पण्डितषण्डैः सारासारार्थनिर्णये शौण्डैः ॥ **255** ॥

पुरुषोत्तमतां शौरेः कल्याणगुणैकतानत्वम्।
निरधारयत्प्रपत्तृत्रातृत्वं च प्रमाणपुञ्जेन ॥ **256** ॥

अतिमधुरोदारार्थप्रतिपादयितृप्रबन्धरूपेण।
अन्तरमानानन्दः प्रसरीसरितुं प्रचक्रमे हि गुरोः ॥ **257** ॥

श्रीवरदराजपञ्चाशतमातानीत्तथा द्रमिडसूक्त्या।
श्रीचिह्नमालिकाद्यं बध्नाति स्म प्रबन्धषट्कमसौ ॥ **258** ॥

आचष्टाष्टभुजाष्टकवेगास्तोत्रे च वेङ्कटेशगुरुः।
दीपप्रकाशपरमार्थस्तुतिकामासिकाष्टकानि तथा ॥ **259** ॥

पिण्डीकृतसारार्थं खण्डितपरवादिचण्डवेतण्डम्।
कवितार्किककेसरिणं सन्तोषात्सन्त ऐडिषत ॥ **260** ॥

श्रीशस्योत्सवविरतौ स्वान्स्वान्देशानयुः सर्वे।
दशसु दिशास्वप्यशुभद्विशदतमं वेङ्कटेशयशः ॥ **261** ॥

काञ्च्यां कदाचिदभवद्बाधा शीतज्वरेण साधूनाम्।
पद्याष्टकेन तस्याः शान्त्यै तुष्टाव चक्रमथ शौरेः ॥ **262** ॥

अखिलप्रहरणविषयं चक्रेऽसौ षोडशायुधस्तोत्रम्।
नानाक्षेत्रनिवासि श्रीपतिसंसेवनान्ननन्द ततः ॥ **263** ॥

## आदिवराह क्षेत्र काण्डः

वृषगिरिशिखरविहारं वेङ्कटनेतारमादरेण गुरुः।
कलयन्नन्तःकरणे प्रास्थित तत्सेवनाय सहशिष्यः ॥ **264** ॥

मार्गे घटिकाद्रिपतिं नरहर्यक्षं समीक्ष्य तद्विषयाम्।
घटिकास्तुतिनामामपि भक्त्या चक्रे स्तुतिं काञ्चित् ॥ **265** ॥

गत्वा हनुमन्नगरं नत्वा भक्तोचितं ययौ त्वरितः।
वेङ्कटनायकचरणौ सेविष्येऽहं कदा कदेति वदन् ॥ **266** ॥

स्वर्णमुखीमथ गत्वा स्नात्वा पद्मासनां च सेवित्वा।
गोविन्दराजसेवां विदधेऽसौ भक्तिभरनम्रः ॥ **267** ॥

शठरिपुतीर्थे स्नात्वा तत्पदपद्मे च वन्दित्वा।
उपगिरमचरत्तारं जङ्गमघण्टा हरेर्गुणान्गृणती ॥ **268** ॥

अथ फणिपतिधरणीधर आर्यस्यासीत्क्रमेण दृग्विषयः।
आकीर्ण एणशिशुभिर्व्याघ्रीस्तन्यं विहृत्य चूषद्भिः॥ **269**॥

पूयमयकायसाहायकतोऽपि ब्रह्मभूयमीप्सन्तः।
यत्र महान्तो यमिनो विषसमविषयास्तपस्यन्ति॥ **270**॥

काषायतयाभूयत हरिणखुरोद्धूतधातुधूळीभिः।
ब्रह्मध्यानपराणां देहानभिमानिनां यमिनाम्॥ **271**॥

फणमणिरुचिरा उरगाः स्वैरविहारं शिरस्सु रचयन्तः।
तपसा शिरस उदित्वररोचिश्शबला जटा इव विभान्ति॥ **272**॥

अच्छतरा यत्र झरी तापहरा राजते शिशिरा।
सत्त्वमयी मूर्तिमती प्रणतान्वेषणपरा प्रभुदयेव॥ **273**॥

तरवो मरुदुद्धूताः कुसुमोत्कररूपमश्रु विकिरन्तः।
भवभयहरवृषधरणीधरतटजनिलाभतो नटन्तीव॥ **274**॥

सानुनि तस्य निषण्णं सजलं जलदं तटित्वन्तम्।
दूराद्दृष्ट्वा वेङ्कटगुरुराट् भक्त्या प्रणन्तुमारभत॥ **275**॥

चपला किल न हि कमला जलदोऽयं नैव जलजाक्षः।
साहस्राक्षश्चापाश्चित्रा वैकक्ष्यमालिका नैषा॥ **276**॥

स्फुरतीन्द्रगोपनिकरो नेदं सौदर्शनप्रभापटलम्।
बिसकण्ठ्युपकण्ठचरी न पाञ्चजन्यो रमासहायस्य॥ **277**॥

स्फूर्जथुरेष न तस्यारावस्सुरवैरिसर्वगर्वहरः।
गैरिकमभ्रकमभ्रे सांनिध्याद्भाति नाम्बरं शौरेः॥ **278**॥

करुणाशिशिरमिरंमदमदहररुचिसारसासनारसिकम्।
प्रणमनविषयः परमं ब्रह्म विराराष्टि शिखरे हि॥ **279**॥

तद्गिरिरारोढव्यो द्रक्ष्यामः पुण्डरीकाक्षम्।
इत्थं साञ्जलिबन्धम् गुरवे शिष्या निवेदयामासुः॥ 280 ॥

परिणतभक्तेर्भगवत्सादृश्यालोकबद्धतृष्णस्य।
आसीदभ्रापगमानन्तरमेव प्रतिष्ठासा॥ 281 ॥

दृष्ट्वा वेङ्कटनाथो नववारिधरं करीरशिखरचरम्।
नूतनतृणरुचिकवचितगोवर्धनधारिणं दध्यौ॥ 282 ॥

अचलगुहां प्रविशन्तं कञ्चन मृगराजमालोक्य।
पुरुषोत्तममस्मार्षीन्निश्चलनिष्ठापरान्तरङ्गविशम्॥ 283 ॥

कञ्चन गजं जरन्तं दृष्ट्वा फुल्लातसीमूले।
गजराजत्राणरतं कमलारमणं स्मरन्नभूत्स्तिमितः॥ 284 ॥

प्रचलकुरङ्गापाङ्गोत्तङ्गतरङ्गानुषङ्गवतीम्।
आनीलां वनराजिं यमुनां मेने महानुभावोऽयम्॥ 285 ॥

कूजत्कीचकरणन श्रवणक्षणदत्तवीक्षणोऽद्राक्षीत्।
बर्हिणमौलिं कञ्चन तरुणतमालं प्रफुल्ललोध्रमपि॥ 286 ॥

अलुलोकत्किल वत्सानालिहतीर्मांसला वन्याः।
तामालमालवालं परितो धेनूश्च कुण्डोघ्नीः॥ 287 ॥

बर्हवतंसं बालं निलयं लावण्यलीलायाः।
मुरळीगानविलोलं कुवलयनीलं किमाकलयत्॥ 288 ॥

आध्यासीदतिधीरं कर्पूरधराधराकारम्।
सीरधरं किं रामं मदिराहारं सहोदरं तस्य॥ 289 ॥

तपनतनयावनान्ते विहरन्तीनां मुकुन्दधेनूनाम्।
उत्पुच्छयमानानां मुदितानां वास्मरद्धहुप्रस्वाम्॥ 290 ॥

अर्जुनसारथिभावद्रौपद्यवनादिकं च कंसारेः।
वृत्तं प्रत्यासत्त्या प्राज्ञो गुरुरस्मरत्किमखिलमपि॥ 291 ॥

कायशिरोग्रीवं सममामीलितलोचनः क्षणं दधे।
पुलकाङ्कितकायोऽथ प्रस्विन्नोऽसावकम्पिष्ट॥ 292 ॥

अस्त्रमसिस्त्रवदनघो धर्मं मा ज्ञासिषुर्यथा तरवः।
व्यलुठदमूर्छदबुध्यत तारं मधुरं च तं स्तवीति स्म॥ 293 ॥

बालमुकुन्द यशोदानन्दन दीनावन दयाळो।
सुन्दरितनन्दमन्दिर दारितदैतेयबृन्द पाहीति॥ 294 ॥

तुङ्गतरशृङ्गनिपतत् झरलग्नाग्रं समीक्ष्य सालतरुम्।
गङ्गापूराकलितं चरणं त्रैविक्रमं दध्यौ॥ 295 ॥

द्रुयुगालम्बां गगने तितरीषन्तीं प्रपातमालोक्य।
मर्कटमालां दध्यावब्धावाबद्धसेतुकं रामम्॥ 296 ॥

पुत्रैः सहितां सारघकुम्भधरां वीक्ष्य सुन्दरीं शबरीम्।
अमृतधरं वृतममरैर्देवं सस्मार मोहिनीरूपम्॥ 297 ॥

इन्धनहरगैरिकनरधारितपरशुं त्वचिष्ठमथ भूर्जम्।
राममिव राजवर्चससंपृक्तब्रह्मवर्चसमपश्यत्॥ 298 ॥

सविधे धातुमयीषु स्थलीषु वारीणि रक्तानि।
अद्रढयन्निव भूर्जद्रुमस्य जमदग्निपुत्रत्वम्॥ 299 ॥

अनिमेषं गिरिशोभां लोकयमानान्विचित्रयानगतान्।
आढ्यान् दृष्ट्वा श्रीनिधिभक्तान्वैमानिकान्मेने॥ 300 ॥

लोकंलोकं लोकं सकलं तुलयन्विचित्रलीलेन।
हरिणा कथमपि धीरः शिखरं स गिरेश्चिरात्समारोहत्॥ 301 ॥

सानन्दं वेदान्ताचार्यो गिरिमित्थमधिरुह्य।
साक्षादकृत विमानं श्रीमानानन्दनिलयाख्यम्॥ **302** ॥

शिष्यैः साकं तर्षादभिकमलानाथमन्दिरं गत्वा।
शश्वदसौ भक्तिभरादष्टभिरङ्गैश्च नन्नमीति स्म॥ **303** ॥

श्रीशं स्तुवान उच्चैरालयमपि स प्रदक्षिणीकृत्य।
मज्जज्जनवृजिनघ्नीमगमदसौ स्वामिपुष्करिणीम्॥ **304** ॥

तत्रानुष्ठितकर्मा सततं संवर्ध्यमानशुभधर्मा।
तृणवद्धिक्कृतभर्मा सञ्चिन्तितसर्वजनशर्मा॥ **305** ॥

अन्तः सन्ततसुस्थितकमलाकान्तोऽतितेजस्वी।
स्वालोकास्ततमस्को वेङ्कटनाथो रराज सूर्य इव॥ **306** ॥

श्रीमद्यज्ञवराहं श्रीमानथ सम्प्रणम्य हृष्टमनाः।
श्रीपतिसेवाक्रमविच्छ्रीवासागारमागच्छत्॥ **307** ॥

द्वारे कृतप्रणामो बलिपीठान्ते च वेङ्कटेशगुरुः।
प्राविशदालयममलो भक्त्या यन् दक्षिणेन बलिपीठम्॥ **308** ॥

चन्दनशालावाहन शालासम्भारशालिकाप्रभृतीः।
श्रीशविभूतीः पश्यन् नीळादेवीं ननाम तत्राथ॥ **309** ॥

अन्तर्गत्वा गुरुरथ पाकागाराधिवासिनीं लक्ष्मीम्।
अखिलोज्जीवनहेतुं त्रिजगज्जननीमसेविष्ट॥ **310** ॥

आनम्य विमानमसावथ गत्वाभ्यन्तरास्थानीम्।
विघ्नौघघ्नमवन्दत मान्यं वैकुण्ठसेनान्यम्॥ **311** ॥

सूक्तिसुधासङ्क्षालितकलुषा सन्तोषिता चतुर्वेदी।
शुद्धोपवीतकपटाद्यं परिरेभेऽतिवात्सल्यात्॥ **312** ॥

शिष्यजनमानसतमः कर्दममतिदुर्दमं विशोषयितुम्।
उदितो हंसोऽसाविति यत्काषायं ब्रवीति सन्ध्याभम्॥ **313** ॥

भवशोषणनिस्तन्द्रं करुणासान्द्रं यतीन्द्रं तम्।
साष्टाङ्गप्रणिपातैरार्यः सन्तोषयामास॥ **314** ॥

विनतातनयं पुरतः परिचितपूर्वं प्रपद्य गुरुः।
जयविजयौ नत्वान्तः प्राविक्षत्तावनुज्ञाप्य॥ **315** ॥

श्रुतिशतकथिता पुरुषोत्तमता यस्मिन्कृतार्थतां याता।
काकत्रातरि करुणोदन्वति तस्मिन्निमज्जयच्चेतः॥ **316** ॥

कमलानायकपदयोः सादरमाराध्यमानयोरमरैः।
कमलोदरसोदरयोर्गुरुमन ऐन्दिन्दिरायिष्ट॥ **317** ॥

लावण्यामृतपूर्णे नाभीपद्माकरे व्यहरत्।
वनमालाघुमुघुमिते वक्षसि पद्मालये विशश्राम॥ **318** ॥

श्रीसालग्रामशिलामालां साजात्यशङ्कयाऽन्वसरत्।
अधरीकृतविधुबिम्बं बिम्बाधरमाननमजिघ्रत्॥ **319** ॥

अखिलपुमर्थावाप्त्यै भजतो विश्वस्य विश्वस्य।
ईप्सितकल्पककल्पकविटपाकारानशिश्रियद्बाहून्॥ **320** ॥

सुरराजकीर्तिलतिकोपघ्नो लक्ष्मीनिवासभूपरिघः।
संसारतापहारकरुचिरनमेरुः किलायमिति॥ **321** ॥

अनुभूतिपारवश्यात्सञ्चरमाणो भुजपथेन।
जानुनि चेतोभृङ्गो मणिमयमुकुराकृतावषरुरोह॥ **322** ॥

अतिमारं सुकुमारं दामोदरविग्रहं रमारामम्।
शुभचर्यो गुरुवर्यः साश्चर्यं शश्वदित्थमन्वभवत्॥ **323** ॥

गुरुरनवरतं शौरेराकारध्यानसुकरताहेतोः।
विस्तृतकटाक्षरूपैः कुवलयमाल्यैस्तमन्तराबध्नात्॥ **324** ॥

अनुपमकृपया श्रीशः प्रसीदतीह प्रपन्नेषु।
इत्थं स्मारं स्मारं व्यस्मेष्ट गुरुस्तदीयया दयया॥ **325** ॥

तस्याधिकृत्य करुणां सत्स्वपि भूयस्सु सुगुणेषु।
भवबन्धमोचनचणं प्रबबन्ध गुरुर्दयाशतकम्॥ **326** ॥

मुक्तिप्रदो मुकुन्दः सर्वज्ञत्वादिगुणपूर्णः।
मोक्षविरोधिनिरासी सर्वार्थप्रापकः श्रयताम्॥ **327** ॥

प्राप्योऽकिञ्चनजनतातरणोपायः प्रपत्तिरेकैव।
व्याधसखः सौशील्यात्परमो दशमूर्तिको जगदपासीत्॥ **328** ॥

दत्त्वा मुक्तानुभवं निर्धूतपुनर्भवं प्रभुर्मह्यम्।
पास्यति मामिति चाख्यत् दशभिर्दशकैरमूनर्थान्॥ **329** ॥

द्वयविवरणरूपं तच्छठरिपुगाथावदुत्तमं सारम्।
शतकं श्रुत्वा श्रीशोऽकलयत्सकलं श्रमं सफलम्॥ **330** ॥

भवताद्भवभयभर्त्सनदक्षो वेदान्तदेशिकस्त्वमिति।
दापिततुलसीतीर्थो हरिरादरतोऽन्वजाग्रहीदार्यम्॥ **331** ॥

शिरसा श्रीनिधिचरणौ नत्वा तस्यानुमत्याऽथ।
मोमुद्यमानहृदयः प्रायादुपकारिकामार्यः॥ **332** ॥

कञ्चित्कालं तत्र स्थित्वा श्रीवासमासेव्य।
शिष्टैर्जुष्टस्तेषामतनीदिष्टार्थपाठनैस्तुष्टिम्॥ **333** ॥

## मुक्तिदेश यात्रा काण्डः

जिगमिषुरुत्तरदेशं मङ्गळमाशास्य वेङ्कटेशस्य।
सह शिष्यैः प्रातिष्ठत सततं तत्पादपङ्कजध्यायी ॥ 334 ॥

छात्रश्रोत्रे चित्रैः श्रीशचरित्रैः पवित्रयन्नार्यः।
हरिसदनं किञ्चिदगात्स तुङ्गभद्रानदीतीरे ॥ 335 ॥

यस्तु गुरुबालमित्रं विद्यारण्यो ह्यगण्यनैपुण्यः।
संन्यस्य तीर्थयात्रोद्देशादविशत्तमुद्देशम् ॥ 336 ॥

उभयोर्विबुधोत्तमयोर्माधववेदान्तदेशिकयोः।
यादृच्छिकावलोकादालापाह्लादमनुभवतोः ॥ 337 ॥

चारमुखादुभयोरपि निरुपममहिमानमाकर्ण्य।
तत्परिसरमभ्यसरद्भूपः किल भुक्करायाख्यः ॥ 338 ॥

आवेद्य स्वात्मानं भूपालः प्रार्थयाञ्चक्रे।
विवशा भूतावेशाच्चिकित्सनीया ममात्मजाद्येति ॥ 339 ॥

सुनिपुणमपि धिक्करणं कुर्वाणं कर्मणोऽस्य वैतृष्ण्यात्।
आर्यं वीक्ष्यान्वक्षं यतिरपि यतते स्म वित्रपस्तत्र ॥ 340 ॥

वैचित्त्यमात्मजाया नृपतेर्यदतित्यजद्युक्त्या।
तस्मात्प्रीत्या तेन प्रत्तां प्राप्तो ह्यमात्यतां तत्र ॥ 341 ॥

तदनु गुरुर्द्वारवतीमुत्तरमधुरां च नैमिशारण्यम्।
गोवर्धनबृन्दावनपुष्करसाकेतमुख्यानि ॥ 342 ॥

आटाटिष्ट सलीलं दिव्यक्षेत्राणि संहृष्टः।
कालविशेषे स्फुरिता लीलाः कमलेशितुः कलयन् ॥ 343 ॥

त्रिदशालयेन सदृशीं विभवविशेषैः प्रविश्य तां काशीम्।
अकृत गुरुर्गङ्गायामवगाहं सचिततापभङ्गायाम्॥ **344** ॥

अत्र हि पतिः पशूनामन्तिमकाले मुमूर्षुणाम्।
श्रीरामनाम रुचिरं कृपया ह्युपदिश्य तारयति॥ **345** ॥

इत्थं प्रशस्य काशीं सारासारांशवेदिनामग्र्यः।
सिंहाद्रिश्रीकूर्माहोबिलपुरुषोत्तमान्यगमत्॥ **346** ॥

पौराणिकेषु दिव्यक्षेत्रेष्वित्थं गुरुर्यात्राम्।
विरचय्य भूय एव श्रीवासावासमासीदत्॥ **347** ॥

वीक्षारण्यक्षेत्रे साक्षाच्चक्रे सरोजदळनेत्रम्।
अखिलमनोरथपूरकर्मायः श्रीवीरराघवं देवम्॥ **348** ॥

भूतपुरीमथ गत्वा बहुभिर्विबुधैर्विराजन्तीम्।
गुरुरादरतो यतिवरचरणसरोजे अवावन्दीत्॥ **349** ॥

इति विविधदिव्यदेशेष्वार्यो यात्रां विधाय मुदा।
पुनरपि काञ्चीमाञ्चीत्प्रत्युद्यातः प्रहृष्टशिष्टगणैः॥ **350** ॥

सुचिरं द्विरदाद्रिपतेर्विरहाद्गुरुरुन्मनायितस्त्वरया।
तस्यागारं गत्वा प्रणतीर्भक्त्याऽचरीकारीत्॥ **351** ॥

काञ्चीतुलामुपैतुं काशीमुख्या न हीशते देशाः।
इत्थं विमृश्य शश्वच्छ्रुत्यर्थानध्यजीगपच्छिष्यान्॥ **352** ॥

कीर्तिमुपश्रुत्य गुरोरागत्यैनं कुदृष्टिसंन्यासी।
बहुधा हि विवदमानः खण्डितपक्षः पराजयं प्राप॥ **353** ॥

मायावित्कर्मन्दी परिभवसन्तप्तमानसो नितराम्।
क्षुद्रं किञ्चित्कर्तुं क्वापि सरस्यामपादुदकम्॥ **354** ॥

अपतद्यतिपरिपीतं तोयं तुन्दे गुरोर्हन्त।
दम्भं गुरुर्विदित्वा स्तम्भं भवनस्य कञ्चनाभैत्सीत्॥ **355**॥

सरसि तु यतिराग्रहतः परिपीयापरिमितं वारि।
दारितमुदरमरातेरिति विस्रब्धो निरीक्षितुमुपागात्॥ **356**॥

कालक्षेपागारस्थूणाविवरादुदित्वरीं धाराम्।
अश्रान्तं वेदान्तं तं चान्तेवासिनामुपदिशन्तम्॥ **357**॥

वीक्ष्यातीव विलक्षो मन्दाक्षभरावनम्रशिराः।
प्रक्षीणसर्वगर्वो वेदान्तगुरुं क्षमापयामास॥ **358**॥

मित्रं कृतोञ्छवृत्तिं श्रुत्वोपचिकीर्षया कदाचिदथ।
विद्यारण्यो दूतं प्रजिघायाचार्यमेत्य स प्रोचे॥ **359**॥

भगवन्नभ्येत्य भवान्भूपालं चेन्निभालयते।
वित्तं दिदापयिषते विद्यारण्यो हि तत्र भवत इति॥ **360**॥

वाचा नाराचायितमाचार्यस्यामुया यदा श्रवसोः।
वैराग्यपञ्चकेन प्रत्युत्तरयाम्बभूव तदा॥ **361**॥

औदरमनलं बाधितुमनलं किं वा सिलं नृणाम्।
प्रसृतेः पूरकमपि किं न धारकं सारसं वारि॥ **362**॥

पथि च पटच्चरकच्चरमयत्रमलमल्लकं भवति।
अहह मुधा विबुधा अपि कुक्षिनिमित्तं भजन्ति भूपालान्॥ **363**॥

क्षोणीकोणशतांशावनतो गर्वन्ति ये क्षुद्राः।
मन्यामहे न धन्यांस्तेषां चाटूक्तिविरचनया॥ **364**॥

देवं सेवितुमेवाभीक्ष्णं निश्चिनुमहे कृपापूर्णम्।
धानामुष्टिमुचे यः कुचेलमुनये ददौ वित्तम्॥ **365**॥

आतनुपतनं त्ववनीपतिसेवातः समर्जितं यत्तु।
उदरधनञ्जयशमनं धनमेतद्दन्ध्रणं भवति॥ 366॥

यत्तु धनञ्जयवर्धनमुदूढगोवर्धनं च धनम्।
आराधनं सुमनसां तत्किल सर्वार्थसाधनमबाधम्॥ 367॥

असकौ दुरीश्वरद्वार्वितर्दिकायां दुरासिकायै मे।
अञ्जलिरस्तु यदास्ते धनमनपायं धनञ्जयसहायः॥ 368॥

जठरानलो ज्वलतु नो बडबानलडम्बरनिरासी।
याचामहे मधुमुचा तृणमपि वाचा न भूपालान्॥ 369॥

नार्जितमस्मत्पित्रा मयापि किञ्चिन्न समपादि।
अस्ति धनं पैतामहमस्माकं हस्तिशैलाग्रे॥ 370॥

एतादृशार्थगर्भम् प्रौढं वैराग्यपञ्चकं श्रुत्वा।
विद्यारण्यो गुण्यं गुर्वग्रण्यं स बहु मेने॥ 371॥

## श्रीरङ्ग क्षेत्र काण्डः

श्रीरङ्गदिव्यनगरीं शिष्यैर्बहुभिः सहाभ्येत्य।
पुरतो विदुषामघुषत्सावष्टम्भं बुधः कश्चित्॥ 372॥

श्रुत्यन्तचिन्तनचणा मामिह वादेन विजयध्वम्।
नो चेत्तीर्थाद्यैर्हरिभवने संमाननां जहीतेति॥ 373॥

वाणीं कर्णकठोरामाकर्ण्य ययुर्हि वैवर्ण्यम्।
प्रतिबुद्धा निरणैषुस्तूर्णं वेदान्तदेशिकानयनम्॥ 374॥

यामुनमुनिनिर्याणावसरे यतिराज एत्य काञ्चीतः।
अत्र किल निर्विवादं राद्धान्तमवीवृधत्स्वीयम्॥ 375॥

तस्यैवैष विवर्तः श्रीमान्वेदान्तदेशिको नियतम्।
सत्वरमानेतव्यः कः प्रतिवक्तास्य सर्वतन्त्रेषु॥ **376**॥

इति निश्चित्य ततस्ते पत्रीं काञ्चिच्च लेखित्वा।
आर्याय प्राहिण्वन्स च तामादाय वाचयामास॥ **377**॥

स्वस्त्यस्तु रङ्गनायकसेनेशो वेङ्कटेशमादिशति।
भवता जय्यः कश्चन वादी कलहायतेऽत्र दर्पेण॥ **378**॥

इह तमरिं जय रञ्जय रामानुजदर्शनालम्बान्।
त्वामालुलोकयिषतो लीलैषा रङ्गनेतुरिति॥ **379**॥

शिरसाभिवन्द्य शासनमार्यः सह बृन्दशश्शिष्यैः।
रङ्गपतिमन्तरङ्गे दधदातेने प्रयाणमभिरङ्गम्॥ **380**॥

यत्र महान्तो यमिनो वेदान्तद्वन्द्वनिष्णाताः।
सन्ततहरिपदचिन्तनविवशा अन्तर्मुखा विराजन्ति॥ **381**॥

पुण्या कवेरकन्या भुवनोदन्याविनाशिनी धन्या।
प्रवहति परितो रङ्गं दधती कुसुमानि वीचीषु॥ **382**॥

तीररुहा अगमाः किल कुसुमं श्रीरङ्गराजपूजायै।
ध्रुवमर्पयन्ति भक्त्या कावेर्यां रङ्गगामिन्याम्॥ **383**॥

तीररुहद्रुमपुष्प्यत्पुष्पाळीनिर्गळन्मधूळीभिः।
मधुरतरा कावेरी वितरति नो कस्य वा मोदम्॥ **384**॥

स्पृहयन् दक्षिणमरुते नादेयीर्विप्रुषो हरते।
निद्राति शेषतल्पे श्रितकल्पद्रुर्हरिर्यत्र॥ **385**॥

शीततमायां नद्यां स्नाता निर्धूतदुष्कृताः सन्तः।
रङ्गपतिभजनतृप्ताः सततं यत्र प्रमोदन्ते॥ **386**॥

जिज्ञपयिषवो देवान्कावेर्यापं सुधावधीरीति।
फलकलशीधृतसलिला यत्राक्रामन्ति नारिकेळाः खम्॥ 387॥

प्रतनं भवताममृतं कलशधृतं कुत्रचिद्गूढम्।
कावेरीयं नव्यं भुवनं भुवनं पुनानमाभाति॥ 388॥

कादाचित्कं शत्रुं जेतुं शक्तिं सुधा दत्ते।
नित्या अपि षड्रिपवो निर्धूयन्तेऽम्बुनाऽनेन॥ 389॥

आयासैरमरत्वं प्राप्तवतामेव सा सुलभा।
रङ्गोपजीविलभ्यं दत्तेऽम्भो नित्यसूरिसाम्राज्यम्॥ 390॥

त्यजत सुधां कावेर्या वार्याहरताथ लप्स्यध्वे।
रूढां कमलाभर्तरि भक्तिं बुद्धिं च शुद्धतमाम्॥ 391॥

इत्याद्यां तारतमीममृतद्वितयस्य वर्णयन्तीव।
नारीकेळतरूणामग्रे शुकशारिका मधुरम्॥ 392॥

देवानुपेक्षमाणान्सलिलं सविधे शिरोधृतं तरवः।
क्रोधाधूनितशीर्षा ध्वाङ्क्षाणां ध्वाङ्क्षणैः शपन्तीव॥ 393॥

पर्णान्तराळपतिताः पुष्पवदाभा विभान्ति रथ्यासु।
विधिनेव रङ्गवल्ल्यो रचिता रङ्गेशितरि भक्त्या॥ 394॥

आवर्तशोभनाङ्गी पयस्विनी गोपरम्परा यत्र।
शरवणचरी विराजति तीरारूढेव कावेरी॥ 395॥

श्रीरङ्गनायिकायाः कटाक्षपातेन पुष्टधनाः।
संहृष्टा यत्र नरा उद्यानपरम्परासु विहरन्ति॥ 396॥

मोक्षोपदेशदेशिक शमधनजनसंश्रिता अनिशम्।
विशदा आश्रमदेशाः संसारश्रान्तिशान्तिदा इव॥ 397॥

चन्द्राभिख्योल्लसिता सहपुन्नागा च यत्र पुष्करिणी।
परिशुद्धा क्षेत्रस्याविक्रियनिर्वैरते च सूचयति॥ **398**॥

वृत्ताकारा तीरगराघवकवचच्छविच्छुरिता।
पुंनागपुष्पकीर्णा साक्षान्नक्षत्रनाथमूर्तिरिव॥ **399**॥

तुङ्गतररङ्गगोपुरमध्यगसरणीषु सञ्चरन्तीभिः।
अमरीभिः सह सरसालापो यत्सौधवासिनां सुलभः॥ **400**॥

सङ्गीतद्रुतगोपुरकृष्टास्त्रिदशीः कवेरकन्याऽब्धिम्।
अनयन्मथने पुनरपि निस्सरणादप्सरस्त्वमापुस्ताः॥ **401**॥

चित्रं चरित्रमेतत् द्वित्राः किल तत्र तत्र परिशिष्टाः।
अभ्रंकषा हि दृषदः कथयन्ति विवेचनाचतुरान्॥ **402**॥

प्राकारराजिरुचिरामारादार्यो निरीक्ष्य तां नगरीम्।
अवसन्यामुनमुख्या अत्रेत्यनमत्सबहुमानम्॥ **403**॥

स्नात्वासौ कावेर्यां प्रसरन्त्यामुत्तरेण तां नगरीम्।
पुण्ड्राणि धारयित्वा देवं भक्त्योत्तममभक्त॥ **404**॥

सविधप्राप्तं तमुपश्रुत्य श्रुत्यन्तदेशिकं सन्तः।
अखिलैर्बिरुदैः सहिताः प्रत्युदगच्छन्प्रहर्षेण॥ **405**॥

विद्याबृन्दनिषद्यां मतिवैशद्याप्तकीर्तिमभिवाद्य।
विनिवेद्योदन्तं ते हृद्यगुणं देशिकेन्द्रमानिन्युः॥ **406**॥

तीर्त्वार्यः कावेरीं नत्वा तत आदिकेशवं तत्र।
श्रीदामोदरगोपुरपरिसरभूभागमभ्यसरत्॥ **407**॥

सेवानम्रत्रिदशाधीश्वरकोटीरकोटिघटितानाम्।
रत्नानामाभाभिः पुनरुक्तसहस्रदीपरुचिम्॥ **408**॥

गोपुरकुहरे विहरल्लीलाकीरादिविकिरनिकुरुम्बैः।
अनुवाच्यमानचतुराम्नायीपाठैर्धरासुरै रुचिरम्॥ **409** ॥

अहमहमिकया सेवाविवशत्रिदशीविभूषणोद्गीर्णैः।
मुक्तामणिभिः शुचिभिर्वितथीकृतरङ्गवल्लिकारचनम्॥ **410** ॥

उपहारपूर्णपाण्या संमदबाष्पाभिवर्षिण्या।
गद्गदनिरुद्धवाण्या निबिडीभूतं प्रणन्तृधोरण्या॥ **411** ॥

आलयमविशद्विमलं लक्ष्मीनिलयस्य रङ्गराजस्य।
स्मयमानमानसोऽभूद्वैभवमभिवीक्ष्य वाग्विभवदूरम्॥ **412** ॥

अन्तः प्रदक्षिणचरश्चतुराननगोपुरं नत्वा।
नाथमुनिं गोदामपि तत्तातं भक्तपादरेणुं च॥ **413** ॥

श्रीभाष्यकारवन्दनमतनीत्तमनोनवीदनघः।
तीर्थादि स्वीचक्रे चक्रे सेवां च चक्रिचक्रस्य॥ **414** ॥

भुवनजनन्या भवनं भेजे श्रीरङ्गनायिकायाः सः।
अनुसन्दधच्छ्रियः स्तुतिमार्यस्तत्पादवन्दनमकार्षीत्॥ **415** ॥

पुरतो नरहरिमभजत्सेवित्वा चन्द्रपुष्करिणीम्।
स्वीकृत्य तीर्थमस्यां कुमुदादींस्तीर्थरक्षकाननमत्॥ **416** ॥

वेदव्यासमसेवत वैकुण्ठेशं च सूरिपरिवारम्।
अभजच्च भक्तिसारं शठरिपुचरणारविन्दयोर्लिल्ये॥ **417** ॥

रक्ताब्जनायिकामप्यनमच्छ्रीतीर्थवासुदेवं च।
श्रीभट्टनाथसेवी श्रीमत्परकालगोपुरमगच्छत्॥ **418** ॥

परकालं नत्वान्तः प्रविश्य यतिराजपीठमानम्य।
नत्वा बलिपीठान्ते पश्यन्सकलं ययौ प्रदक्षिणयन्॥ **419** ॥

ज्ञानवराहं लक्ष्मीनारायणमस्य मूर्तिदशकं च।
हयवदनं च ववन्दे स गृणन्स्तोत्राणि तद्गुणानुगुणम् ॥ **420** ॥

अरविन्दनायिकाख्यां माहानसिकीं श्रियं च शिश्राय।
पाण्ड्यनृपगोपुरान्ते भद्रसुभद्राववन्दत द्वास्थौ ॥ **421** ॥

प्रणिपत्य प्रणवमयं विमानमथ वेदशृङ्गनामानम्।
हनुमद्विभीषणाभ्यां सहितं सेनेशमाश्रयत ॥ **422** ॥

नवनीतभुजं नत्वा मण्टपमारुह्य रङ्गराजस्य।
साष्टाङ्गप्रणिपातान्पुरतस्तस्याकरोदार्यः ॥ **423** ॥

आनम्य वैनतेयं पुरतो देवस्य निवसन्तम्।
दौवारिकजयविजयावनुमान्योद्वीक्ष्य गर्भगृहम् ॥ **424** ॥

नाभिनळिननागशयननृसिंहनारायणप्रमुखान्।
तत्र परिवारभूतान्भक्त्या नत्वाथ तन्मध्ये ॥ **425** ॥

स्वेच्छागृहीतकायं स्वच्छं तापिञ्छगुच्छसच्छायम्।
सज्जनरञ्जनमार्यः किमपि परं तत्त्वमैक्षिष्ट ॥ **426** ॥

विस्मयविस्तीर्णाभ्यां तर्षोत्कर्षेण तरळाभ्याम्।
अक्षिपुटाभ्यामपिबच्छ्रिय ईशानं शयानमधिरङ्गम् ॥ **427** ॥

सस्पृहमुदीक्ष्यमाणा शारीरी रङ्गशायिनः कान्तिः।
शोभां कुवलयिताया रवितनयाया असस्मरद्रसिकैः ॥ **428** ॥

विवशविनिर्गतसरस श्रीरङ्गध्यानसोपानः।
सादरमदरीदर्शीदाचरणाम्भोजमामूर्धम् ॥ **429** ॥

उत्तरणोपायतयोपेयां भववारिधिं तितीर्षद्भिः।
पादपयोरुहयुगळीमध्यक्षयति स्म रङ्गनाथस्य ॥ **430** ॥

विदुषे प्रपदनहेतोः प्रपदस्यावेदनायेव।
विभुना प्रसार्य कलितं द्राघीयांसं च जानुपर्यन्तम्॥ **431** ॥

त्रपयेव विनतशिरसा शेषेण निरीक्ष्यमाणसौन्दर्यम्।
वामतमं वामभुजं वेदान्तगुरुर्व्यलोलोकीत्॥ **432** ॥

उपधानीकृतमांसलमहिपतिफणमण्डलप्रान्ते।
अद्राक्षीत्परिरक्षणदक्षिणमथ दक्षिणं बाहुम्॥ **433** ॥

करुणाम्बुधिपरिवाहाकारे कर्णान्तविश्रान्ते।
सत्त्वरसदीर्घिकामे अनुवीन्नतदैन्यमोचने नयने॥ **434** ॥

भुवनोज्जीवनमैक्षत किरीटवैडूर्यकान्तिधाराभिः।
क्षेत्रं श्यामळसस्यं शिखरिझरीभिः सुसिच्यमानमिव॥ **435** ॥

नित्योत्सवसंहृष्टं सहलक्ष्मीकं सपरिवारम्।
इत्थं वन्दित्वार्यस्तीर्थतुलस्यादिकं लेभे॥ **436** ॥

रङ्गेशं स्थापयितुं निजहृदयं नेनिजान इव।
संमोदबाष्पवर्षी गुरुरथ लोकैरवालोकि॥ **437** ॥

रङ्गेशेनाशीर्भिः स्तुतिप्रसन्नेन तोषितो दयया।
अध्यासिष्टाथ बृहन्मण्डपमार्यः सपरिवारः॥ **438** ॥

विविवदिषुः कोऽपि बुधो वेदान्ताचार्यमभ्येत्य।
आकारो ह्रस्वो वः कीर्तिर्महतीति वाचमूचेऽमुम्॥ **439** ॥

तदपि चिखण्डयिषुर्गुरुरवदद्दीर्घः किलाकारः।
साम्प्रतमाकारस्य ह्रस्वत्वं साम्प्रतं कथं वेति॥ **440** ॥

समयं बहुतिथमार्यो व्यवहृत्य जिगाय सैष वादो हि।
अभवत्प्रबन्धरत्नं प्रबलं शतदूषणीनाम॥ **441** ॥

विजितोऽवादीद्वादी भवतैव जितोऽस्मि तद्भवानादौ।
तीर्थादि लब्धुमर्हत्यहमथ न त्वत्रवासिनः पूर्वम्॥ **442** ॥

मदनन्तरमस्तु तवेत्युक्त्वा तीर्थं प्रदाप्य सर्वेभ्यः।
स्वयमग्रहीदजिग्रहदमुना तेनाथ विस्मिताः सर्वे॥ **443** ॥

आर्जितकीर्तेर्लौकिकविषयेष्वप्यूर्जिता प्रज्ञा।
क्रमते निर्बाधं ते निर्जरगुरुणापि दुर्जयोऽसीति॥ **444** ॥

स्तुत्वा साञ्जलिबन्धं वादी स यथागतमगच्छत्।
रङ्गपुरमध्यवात्सीद्रङ्गेशानस्य शासनादार्यः॥ **445** ॥

अथ तु कदाचन रामानुजयतिराजो गुरुं स्वप्ने।
पादपयोजप्रणतं परिमृश्येत्थं वचोऽवोचत्॥ **446** ॥

वर्धय सिद्धान्तपथं कुमतं छिन्धि प्रचारयाचारान्।
त्रैवर्गिकान्निरस्येरपवर्गगतेर्निरूपयोपायम्॥ **447** ॥

मन्दधियामपि सुलभान्सिद्धान्तपथानुरोधिनो ग्रन्थान्।
विविधान्सङ्ग्रथ्नीया ब्रह्मविदानन्दनो भूयाः॥ **448** ॥

इति स तु यतिपत्युक्तिं श्रुत्वा सुप्तिं विहाय तं स्तुत्वा।
श्रीभाष्यकाररूपाधिकरणसारावळीं चक्रे॥ **449** ॥

अन्यादृङ्नैपुण्यं दृष्ट्वा श्रीरङ्गनाथोऽथ।
वेदान्ताचार्य इति प्रथितामाख्यामदात्तस्मै॥ **450** ॥

आचष्ट सर्वतन्त्रस्वतन्त्र इति रङ्गनायिकायेनम्।
इत्याख्याभ्यां प्रथितो बहुभिः शिष्यैर्व्यलालासीत्॥ **451** ॥

यतिपतिशासनवशतासादितयशसाऽथ वेङ्कटेशेन।
तत्स्मृत्यनुवृत्त्यै किल भक्त्या यतिराजसप्ततिश्चक्रे॥ **452** ॥

चक्रे श्रीभूनीळास्तोत्राणि दशावतारविनुतिं च।
सव्याख्यतत्त्वमुक्ताकलापमुख्यांश्च विंशतिग्रन्थान्॥ **453** ॥

भूगोळं सव्याख्यं तस्मिन्कृत्वाऽखिलेभ्य उपदिशति।
विद्यापुरभूपसभात्काचन पत्री समायाता॥ **454** ॥

विद्यारण्याक्षोभ्यौ वादिप्रतिवादिनौ यतिनौ।
श्रुत्यन्ते तद्वादप्रतिवादद्योतनौ च लेखौ द्वौ॥ **455** ॥

प्रेष्येते निर्णीत्यै तत्र भवन्तो वहन्तु माध्यस्थ्यम्।
इति पत्रीमनुवाच्य द्वे अपि वेदान्तपत्रिके दृष्ट्वा॥ **456** ॥

असिना तत्त्वमसिना परजीवप्रभेदिना।
विद्यारण्यमहारण्यमक्षोभ्यमुनिरच्छिनत्॥

बाल्यस्नेहाद्यपुरस्कारान्निष्पक्षपातः सन्।
इति राजसभां प्रति स प्रतिपत्रं देशिको व्यलिखत्॥ **457** ॥

विद्यारण्योऽमर्षात्पुरुषमुखेणाबभाषे तम्।
शतदूषणीं त्वमद्य प्रेषय खण्डिष्यते निमिषात्॥ **458** ॥

गुरुणा सद्यः प्रहितां विदोषगन्धामुदीक्ष्य तां स यती।
कमपि चकारं व्यर्थं मत्वा तं चिह्नयामास॥ **459** ॥

वर्णयति स्म गुरुस्तत् ज्ञात्वा चस्य प्रशस्यमर्थगणम्।
वीक्ष्य चकारसमर्थनमथ यतिवर्योऽपि निर्ममो जातः॥ **460** ॥

वन्द्या न शठजिदाद्यास्तेषां ग्रन्थाश्च न प्रमाणमिति।
कट्टु दूषयतो गुरुराडचखण्डद्रौडपण्डितान्वादैः॥ **461** ॥

बहुधा विदाय वादं प्रथासहिष्णुस्तु कृष्णमिश्राख्यः।
विजितो रूपकमेकं प्रबोधचन्द्रोदयाख्यमदद्रर्शत्॥ **462** ॥

सङ्कल्पसूर्यपूर्वोदयाभिधेयं विधाय सुधीः।
सद्यः किञ्चन रूपकमदीदृशत्सोऽपि विस्मितोऽगच्छत्॥ **463** ॥

डिण्डिममजयत्तादृशमवेक्ष्य तस्यापि राघवाभ्युदयम्।
विस्माययति स्मैनं सद्योऽथ विधाय यादवाभ्युदयम्॥ **464** ॥

दाक्षिणदिव्यक्षेत्राण्यासेवितुमेष निर्गतो भक्त्या।
सत्यगिरिश्रीगोष्ठीपुरमधुरादीनि वीक्ष्य सेतुमगात्॥ **465** ॥

बालार्ककिरणमसृणं सलिलाशयमार्य आलोक्य।
अनलमयरघुवरशरज्वालाजालाकुलं किलाकलयत्॥ **466** ॥

त्वङ्गत्तरङ्गवर्गाघातं दृष्ट्वा गुरुर्मेने।
इत्थं रघुपतिदूतैर्गण्डोपलपातनं विरचितमिति॥ **467** ॥

नियतं नीचा वीचय आश्रितलोकाय वितरीतुम्।
वृजिननिरासनपटुना जलनिधिना सृज्यमाननीलपटाः॥ **468** ॥

उपहारमर्पयित्वा सादरमार्यः समुद्रराजाय।
गाढां भक्तिं रामे वहन्पयोऽसाववागाढ॥ **469** ॥

अभिवन्द्य दर्भशयने रामं ताळीदळश्यामम्।
श्रीधन्विक्षेत्रगतो गोदां नत्वा स्तुतिं चक्रे॥ **470** ॥

वटपत्रशायिनं च श्रीमन्तं विष्णुचित्तमपि नत्वा।
पूर्णापताम्रपर्णीतीरे कुरुकापुरं प्राप॥ **471** ॥

वकुलाभरणमवन्दत विवेकमुकुळं विकासयितुम्।
अकृत कृपयौपनिषदं सारं यः सर्वजनसुलभम्॥ **472** ॥

ताम्रातीरपदव्या ताळीवनमर्मरारवान् शृण्वन्।
दिव्यतमदेशनवकं गत्वा चक्रे हरेर्नमोवाकम्॥ **473** ॥

नत्वा भक्त्या श्रीमाननन्तशयनं च पद्मनाभमथ।
चोळेषु कुम्भघोणप्रभृतीन्गत्वा ययौ काञ्चीम्॥ **474** ॥

मन्त्रकलाकुशलः किल गुरुमाह स्माहितुण्डिकः कश्चित्।
मां जयतु सर्वतन्त्रस्वतन्त्रता युज्यते हि भवत इति॥ **475** ॥

अतिनिर्बन्धाद्धरिगृहवल्मीकोपान्तमाश्रित्य।
रेखाः सप्त पुरस्तात्कृत्वा सर्पान्प्रहिण्विति जगाद॥ **476** ॥

उन्नतकुञ्चितदक्षिणसव्यपदः क्लृप्तसङ्गीतम्।
रौद्रान् स काद्रवेयान्व्यद्रावयदार्यमुद्दिश्य॥ **477** ॥

तत्तद्रेखोपान्तं प्राप्य यथाशक्ति विश्रान्ते।
उरगगणे रोषेणामुञ्चदहिं शङ्खपालकं नाम॥ **478** ॥

असकृत्सृक्वलिहाभ्यां रसनाभ्यां विद्युदाभाभ्याम्।
रोषण आस्तीर्णफणाफूत्करणाभ्यां च भीषणो निरगात्॥ **479** ॥

बहुरेखीमपि तीर्त्वा पर्यन्ततलस्पृशं तमश्रान्तम्।
अग्राहयदुग्राहिं स्तोत्रप्राप्तेन वैनतेयेन॥ **480** ॥

उड्डीनेऽण्डजराजे तुण्डेनादाय चण्डकुण्डलिनम्।
खण्डितमनुपाण्डित्यो दण्डवदाचार्यपादयोरपतत्॥ **481** ॥

जीवननिदानमनुपममहिमन्मम शङ्खपालकं देहि।
दीने जने दयस्वेत्याक्रन्दन्देशिकं स आर्थयत॥ **482** ॥

विरचय्य गरुडदण्डकमथ तत्प्रीतेन गरुडेन।
दययादापयदुरगं विनताय गुरुर्नरेन्द्राय॥ **483** ॥

पुनरप्यञ्जनशैलं गत्वा विनिवृत्य कुत्रचिन्नगरे।
पाकासौकर्येणानाहारोऽशेत गुरुरथ कदाचित्॥ **484** ॥

आपणिकोऽभ्येत्याभणदार्यं विपणौ सितो हयश्चरति।
नूनं स हि भावत्कः पदपङ्क्त्या प्रापितोऽस्मि यदिहाहम्॥ **485**॥

लवणं लेढि कुळुत्थं कबळीकुरुते तृणेढि चणकं च।
अर्वन्तं चर्वन्तं सर्वं तं ते निवर्तयस्वेति॥ **486**॥

श्रुत्वा क्षणं विलक्षस्तीक्ष्णधिया सम्यगेक्ष्य निरणैषीत्।
विपणिमविक्षल्लक्ष्मीहयवदनो मे वलर्क्षहयरूपी॥ **487**॥

क्षीरमुपाहर किञ्चित्स निवर्त्येतेति चोदितोऽथ वणिक्।
चक्रे तथा हयमुखं सन्तर्प्य गुरुः सशिष्योऽपात्॥ **488**॥

निर्वर्ण्यानिर्वाणं विपणिं निर्वाणमापदापणिकः।
चर्वितशेषे निखिले कनकमये कां दशामिति न जाने॥ **489**॥

श्रीरङ्गं गुरुरगमत्तत्र श्रीवैष्णवा बहवः।
नानादेश्या देशिकमित्थं विज्ञापयामासुः॥ **490**॥

अनुदिनमनुसन्धातुं रसतस्त्रय्यन्तसिद्धान्तम्।
अस्मत्प्रज्ञानुगुणप्रबन्धरूपं विधेहीति॥ **491**॥

पठतां निस्सन्देहं दुहानमानन्दसन्दोहम्।
तत्त्वत्रयचुळकादिमरहस्यजालं स लीलया चक्रे॥ **492**॥

श्रुतिलक्ष्मसु नैपुण्याद्वैराग्याच्छ्रीविभुत्वनिर्वहणात्।
व्यासस्तस्य सुतो वा तातो वेत्यामृशन्ति यं धीराः॥ **493**॥

सारस्वतसारज्ञः प्रबन्धुमार्यः समुज्जिहीत यदि।
भारतलेखकवेगा अपि शिष्या लेखनाय नालमहो॥ **494**॥

सरसान्निमिषग्रथितान् ग्रन्थानालोक्य हृदयिका विबुधाः।
मन्दितवेगा गच्छति पङ्गूरमरापगेति निश्चिक्युः॥ **495**॥

कवयन्त्यन्ये कवयः कवितां कवितार्किकेश्वरेऽन्यादृक्।
काकाः खमुच्चरन्ते किं ते विनतासुतायेरन् ॥ **496** ॥

भागवतभागधेयं मूर्तं भक्तिर्विरक्तिर्वा।
भूयश्चाविर्भूतो भगवान्श्रीभाष्यकारो वा ॥ **497** ॥

व्यासपतञ्जलिजैमिनिगौतममुख्याः किमेकरूपेण।
अतनिषुरवतरमद्येत्यूहामासुस्तमखिलजनाः ॥ **498** ॥

छात्रजनबद्धजैत्रध्वजपटपवनावधूननेनेव।
तन्नामश्रवणेन प्रतिवादिजना अकम्पिषत ॥ **499** ॥

यस्मादस्मादबिभयुरखिलाः कवयश्च तार्किकाश्च ततः।
कवितार्किकसिंह इति प्रथितं बिरुदं गुरुर्लेभे ॥ **500** ॥

रङ्गपतिदत्तवेदान्ताचार्याख्यां कृतार्थयता।
शिष्यास्त्रिंशद्वारं श्रीभाष्यं श्राविता गुरुणा ॥ **501** ॥

संमाननिरपेक्षो वैभवमपि गूहमानः स्वम्।
भूयसि विभवेऽप्यभवद्विनयनिकाय इव धृतकायः ॥ **502** ॥

शमदमसौशील्याद्यैर्गुणमणिभिः सागरायितो हि गुरुः।
आश्चर्याद्दिनचर्यां तस्य हि सन्तो ब्रुवन्तीत्थम् ॥ **503** ॥

रात्रेर्यामे तुर्ये प्रबुध्य चरणौ विशोध्य चाचम्य।
पारम्परीं गुरूणामस्मार्षीदादरादार्यः ॥ **504** ॥

हृत्पुण्डरीकमध्ये ध्यात्वासौ पुण्डरीकाक्षम्।
पक्त्रिमभक्तिश्चित्रैः स्तोत्रैरतनोत्तदाननोल्लासम् ॥ **505** ॥

स्मारंस्मारमपारं करुणारसपूरमदसीयम्।
सदृशं वस्तु विलोकितुमुत्क इवावाप कावेरीम् ॥ **506** ॥

चक्रे रदशुद्ध्यादिकमार्यः स यथास्मृतिविदानम्।
अघमर्षिणीरथ ऋचस्तारतरं सम्पठन्सस्नौ॥ **507**॥

शुद्धवसनोर्ध्वपुण्ड्रः पवित्रपाणिर्विधाय सन्ध्यादि।
आपादचूडमनमच्छ्रीमन्तं रङ्गनाथमथ॥ **508**॥

स्वाराध्यं च हयाननमानम्यौपासनमकार्षीत्।
शिष्येभ्यः प्रीत्यार्तान्श्रीभाष्यादेरुपदिदेश॥ **509**॥

भगवद्गुणगणवर्णनपरायणः साधुभिर्दत्तान्।
एकाह्नदेहयात्रामात्रानथ तण्डुलानुपादत्त॥ **510**॥

पूषणि यजुषार्चिष्मति कृत्वा माध्याह्निकं कर्म।
सात्त्विकपदार्थजातैर्हयाननाराधनमतानीत्॥ **511**॥

निर्वर्तितपञ्चमहायज्ञो हृद्यैरगस्त्यशाकाद्यैः।
अतिथीनन्तर्यामिणमपि च गुरुस्तर्पयामास ते॥ **512**॥

मधुरमधुरं शठरिपोर्गाथासाराम्बुराशिमवगाह्य।
भगवद्गुणगणमौक्तिकमणिसङ्ग्रहणप्रवण आसीत्॥ **513**॥

पौराणिकानि भगवत्तत्त्वान्यप्यैतिहासिकानि गुरुः।
शिष्येभ्यः समुपदिशन्नासायमयापयद्दिवसम्॥ **514**॥

सायाहनि विरचय्यानुष्ठानमथाभिगम्य हयवक्त्रम्।
स चकार योगनिद्रां शुद्धे शयने द्वयानुसन्धायी॥ **515**॥

यतिपतिमतसात्कृतमतिमार्यं ह्याचार्यगुणपूर्णम्।
तत्त्वबुभुत्साकुतुकाद्बहवः शिष्या अशिश्रियन्भक्त्या॥ **516**॥

तेष्वपि वरदो नाम्ना तस्मादेवाप्तपञ्चसंस्कारः।
षड्दर्शनीं सुमेधा गुरुभक्तो लीलयाधिजगे॥ **517**॥

दुर्जयमजयद्वादिनमिति सन्तोषेण वेङ्कटेशगुरुः।
यस्मै बिरुदत्वेन स्वातन्त्र्यं ब्रह्मतन्त्रेऽदात्॥ **518** ॥

यः सर्वसारवेदी विरक्तिभूम्ना तु संन्यस्य।
पारम्पर्यावर्धयदनघं यतिराजसच्छास्त्रम्॥ **519** ॥

गूढाशययतिपरिबृढसिद्धान्तविवेचकेन येन कृतः।
वेदान्तकौस्तुभ इति ह्यादर्शो दर्शनार्थानाम्॥ **520** ॥

आश्चर्यचर्यमार्यं दृष्ट्वा भाष्यार्थमधिगन्तुम्।
उत्तरवीथ्यावसथो लोकाचार्योऽपि शिश्राय॥ **521** ॥

आह्वन्वादाय गुरुं यतिराजमतावलम्बिनः केचित्।
प्रह्वस्त्वार्यो नैच्छत्सिद्धान्तस्थैः समं वादम्॥ **522** ॥

अल्पज्ञविप्रलम्भक एष न शास्त्रार्थतत्त्वज्ञः।
नोत्तिष्ठतेऽतिभीरुर्वादायेति व्यदूदुषन्नेते॥ **523** ॥

ते द्वारि पादरक्षां वैभवमसहिष्णवोऽबध्नन्।
तां वीक्ष्य निर्विकारो गुरुरगृणात्पद्यमेकमित्थमहो॥ **524** ॥

कर्मावलम्बिनः केचित् केचिज्ज्ञानावलम्बिनः।
वयं तु हरिदासानां पादरक्षावलम्बिनः॥

श्रुत्यन्तदेशिकेऽस्मिन्निशम्य तेऽन्यादृशीं शान्तिम्।
भीतास्तत्पदकमले प्रणेमुरपराधशान्त्यर्थम्॥ **525** ॥

देवो वरदो देशिकमवदद्दयया कदाचन स्वप्ने।
बुद्ध्या विशुद्धया ते परिपक्त्रिमया विरक्त्या च॥ **526** ॥

प्रीये प्रददे पुत्रं प्रकाशमानं मदंशेन।
जितकाम काममेनं मम कामं पूरयस्वेति॥ **527** ॥

गर्भाधानानुगुणं समयं बहुधा परीक्ष्य गुरुराजः।
वरदादेशवशेन क्षणमात्मानं युवानमभिमेने ॥ **528** ॥

अष्टाचत्वारिंशे नलवर्षे नभसि रोहिण्याम्।
आत्मज उदियाय गुरोरुदयगिरेर्बालसूर्य इव ॥ **529** ॥

वरदो नाम्ना तनयः परिष्कृतो जातकर्माद्यैः।
ववृधे द्विवर्षदेश्यस्तातानन्देन सममेव ॥ **530** ॥

श्रीवैष्णवा वृता अपि जनकश्राद्धं चिकीर्षुणा गुरुणा।
मत्सरिभिः प्रतिरुद्धास्तत्समये भुञ्जते स्म गृह एव ॥ **531** ॥

भगवच्चरणालम्बी वेदान्तगुरुस्तु निश्चिन्तः।
निर्वर्तितमाध्यन्दिननियमः पितृकार्यमारभत ॥ **532** ॥

वरदं हयवदनं चावाह्य स्तुत्वा हविर्दत्त्वा।
प्रतिसीरान्तरितोऽसौ पितृसूक्तं श्रद्धया ह्यजपीत् ॥ **533** ॥

अन्तर्यामितया यौ विप्रमुखाद्धव्यमग्रहीषाताम्।
तौ किल वरदहयास्यौ साक्षाद् गुरुदत्तहव्यमाश्नीताम् ॥ **534** ॥

विष्वणनं श्रुत्वार्यस्तृप्तः श्राद्धावसानेऽसौ।
भोजनपात्रे कीर्णां हयमुखळालामदात्पत्न्याः ॥ **535** ॥

वाञ्छिष्यामि यदाहं देहि तदेत्यन्वशाच्च तामार्यः।
अज्ञातं हि पितृभ्यामपिबत्तां बालको वरदः ॥ **536** ॥

उपविष्ट इष्टपङ्क्तौ लाला नष्टेति विज्ञाय।
आर्योऽवादीदस्याभिजनः किल नाश्नुवीत वृद्धिमिति ॥ **537** ॥

जाज्वल्यमानवपुषौ वरदहयास्यौ बहिर्गत्वा।
स्पष्टमसूयाविष्टैर्दृष्टौ सद्यस्तिरोऽधत्ताम् ॥ **538** ॥

श्राद्धे निमन्त्रितास्तत्प्रतिरोद्धारश्च विस्मेराः।
भक्त्या देशिकमनमन्ब्रह्मविदपचारतश्चकिताः॥ **539**॥

आत्मजमुपनीय गुरुः शास्त्राण्यध्यापयामास।
पितरं वरदाचार्योऽप्यनुकुर्वाणो गुणोज्ज्वलो ववृधे॥ **540**॥

सारतमयुक्तिनिचिताधिकरणचिन्तामणिप्रमुखान्।
ग्रन्थान्विधाय वरदाचार्योऽप्यतनीन्मुदं विदुषाम्॥ **541**॥

उद्वोढुमना वर्णी कश्चिदयाचद् गुरुं वित्तम्।
याच प्रभुमेतमिति प्रोत्साह्यासूयुभिः प्रहितः॥ **542**॥

आश्रितरक्षणदक्षिण आर्योप्यन्वीक्ष्य वर्णिनं सदयम्।
अभिलषितं पूरयितुं श्रीस्तुतिमनुसन्दधाति स्म॥ **543**॥

स्तुतिसुहिताऽर्णवदुहिता स्वर्णान्यन्तर्हिताऽवर्षीत्।
खण्डानिव चण्डांशोस्त्वष्टुष्टङ्केन खण्ड्यमानस्य॥ **544**॥

सर्वं स्वीकुर्विति गुर्वादेशात्पूर्णकामतां वर्णी।
अभजच्चरणाम्भोजं विरोधिवर्गोऽपि देशिकेन्द्रस्य॥ **545**॥

रङ्गेशाज्ञा भुङ्क्ष्वेत्येकादश्यां व्रतस्य भङ्गाय।
गुरवे त्वसूयुवशगो दध्योदनमर्चकोऽदत्त॥ **546**॥

भिन्नः श्रुतिस्मृतिभ्यामभूतपूर्वो विभोर्यदि निदेशः।
युक्तमिति गुरुगृहीतं हरिराविश्यार्चकं स्वयं जगृहे॥ **547**॥

अज्ञोपज्ञं चेष्टितमेतन्नास्माकमाज्ञेति।
अशिषच्च धीरमार्यं रमासखो भक्तवात्सल्यात्॥ **548**॥

तस्योपादानरतेर्वैराग्यपरीक्षणाय तदा।
सौवर्णखण्डमण्डिततण्डुलमुष्टीर्ददुः केचित्॥ **549**॥

वीक्ष्यादृष्टसुवर्णा सुवर्णखण्डानि गुरुपत्नी।
किमिदमिति शङ्कमाना पत्ये विज्ञापयामास॥ **550** ॥

प्रक्षिप्य स तु बहिष्टाल्लोष्टवदखिलानि हेमशकलानि।
स्वयमेव तण्डुलानां तदादि परिशोधनं चक्रे॥ **551** ॥

हस्तेनाप्यस्पृष्ट्वा यष्ट्या निष्कासिते स्वर्णे।
अर्पयितारः सर्वे व्यस्मेषत वीक्ष्य वैराग्यम्॥ **552** ॥

कश्चित्कविः सशिष्यो नाम्ना किल रम्यजामाता।
रङ्गेशस्य स्थानिकवर्गे गोष्ठ्यामवीवदद्ध्येवम्॥ **553** ॥

श्लोकान्सहस्रमस्यां रजनौ यो वा कविस्तनुते।
कवितार्किकसिंहत्वं सोऽर्हति लब्धुं न चान्य इति॥ **554** ॥

स कविर्हरिपदकमलं गुरुर्विनीतस्तु पादुकां हि हरेः।
अधिकृत्य प्रत्येकं प्रतिजज्ञाते सहस्रपद्यकृतिम्॥ **555** ॥

पञ्चशतीं पद्यानामतनोत्स कविर्महाप्रयासेन।
निश्चिन्तं हि निदद्रौ ध्यात्वा श्रीशं यथापुरं स गुरुः॥ **556** ॥

शिष्यस्वरूपधारी हयाननोऽवोचदर्धरात्रेऽमुम्।
युक्ता किं निद्रा ते पद्यसहस्रं प्रतिज्ञाय॥ **557** ॥

श्रुत्वा तत् शिष्यधिया गुरुरपि तं वच्मि विलिखेति।
उक्त्वा पद्यसहस्रं सहृदयहृदयङ्गमं व्यधित॥ **558** ॥

तेन कविनाऽथ मिळितो गोष्ठ्यां स हयाननानुकृतरूपम्।
आहूय शिष्यमशिषत्त्वल्लिखितं ग्रन्थमानयस्वेति॥ **559** ॥

निष्पिष्यमाणपाणिं वचनश्रवणेन तरळाक्षम्।
ग्रन्थः को? व्यलिखत्कं ? कदेति चिन्ताकुलं तमालक्ष्य॥ **560** ॥

हयमुखलीलेति गुरुर्झटिति ज्ञात्वा पुनश्च तमवादीत्।
पूजापेटकमध्ये जागर्त्यानीयतां प्रबन्ध इति॥ **561** ॥

आनीय तं सहस्र श्लोकीं शिष्येऽथ पठितवति।
अह्वासत कवितार्किकसिंहेति गुरुं समे सभास्तारा:॥ **562** ॥

तं कविमतीर्णसन्धं ह्रीणं पादूसहस्रमालोक्य।
दयमानमानसोऽसौ विनयविनम्रो गुरुरवादीत्॥ **563** ॥

सूते सूकरयुवतिः सुतशतमत्यन्तदुर्भगं झटिति।
करिणी चिराय सूते सकलमहीपाललालितं कलभम्॥

कवितार्किककेसरिणो विनयं सौरभ्यमिव हेम्नः।
अनुभूय तत्पदाब्जप्रवणोऽभूद्रम्यजामाता॥ **564** ॥

मत्याऽथ युक्तिमत्याऽनन्वितशब्दान्सुसाधु सङ्गमयन्।
ग्रन्थं गुरुः समस्यासहस्रनामानमातेने॥ **565** ॥

नानानतल (३६०००) ग्रन्थैर्लोकाचार्यस्य तातपादेन।
आख्याता व्याख्यैका वकुळाभरणीयवाग्विलासस्य॥ **566** ॥

तामालुलोकयिषता ग्रन्थानयनाय वेङ्कटेशेन।
प्रेषितमवदच्छिष्यं लोकाचार्यः स्वशिष्यनिर्बन्धात्॥ **567** ॥

गुरुकृपया ह्यधिगम्याः सिद्धान्तार्था विशेषेण।
निर्मर्यादं शास्त्रं पुस्तकपाठादधिगमश्चेत्॥ **568** ॥

इति तद्वाणीं श्रुत्वा स्मित्वा श्रुत्यन्तदेशिको मत्या।
पर्यचिचिन्तन्मातुलकथितान्द्रविडागमस्य सारार्थान्॥ **569** ॥

तेने बृहतीं विवृतिं स्वयमपरां निगमपरिमळाख्याताम्।
मुनिवाहनभोगाद्यां व्याख्यामाख्यच्च देशिकः कुतुकात्॥ **570** ॥

सुरभाषायां द्रविडोपनिषत्तात्पर्यरत्नालीम्।
आराधनक्रमादिग्रन्थानामष्टकं च स वितेने॥ 571 ॥

राजमहेन्द्रपुरस्याधीशः सर्वज्ञसिंहाख्यः।
सिद्धान्तार्थश्रवणे कुतुकी प्रजिघाय वैष्णवान्गुरवे॥ 572 ॥

सम्यक्परीक्ष्य वृत्तं श्रद्धां भक्तिं च शिष्यस्य।
स सुभाषितनीव्यादिग्रन्थान्कृत्वा व्यबूबुधत्तत्त्वम्॥ 573 ॥

तत्त्वं ग्रन्थमुखात्स ज्ञात्वा सर्वज्ञसिंहोऽपि।
अनुदिनमार्यं प्रणमंस्तच्छासनवश्य एवासीत्॥ 574 ॥

लक्ष्मणनामाचार्यः शिबिकामारुह्य शिष्यपरिवीतः।
अखिलैर्बिरुदैः साकं रथ्यामार्गेण समचरत॥ 575 ॥

अवलेपात्तच्छिष्या अधितिष्ठन्तं गृहाळिन्दम्।
अप्रत्युत्थितिकुपिताश्चकृषुः श्रुत्यन्तदत्तधियमार्यम्॥ 576 ॥

## श्रीरङ्गनाथ पुनः प्रथिष्ठा काण्डः

नैक्षिष्यन्यपरत्वात्क्षाम्येत्यनुगम्य चानम्य।
प्रतिघविघाताकाङ्क्षी गुरुरगमत्सत्यमङ्गलग्रामम्॥ 577 ॥

श्वित्रविचित्रं गात्रं गोत्रं पुत्रेण परिहीणम्।
लक्ष्मणसूरेरासीत्स्वान्तं च नितान्ततान्ततां यातम्॥ 578 ॥

पत्युर्दैन्यनिदानं दूना दयिता विमृश्य तमवोचत्।
ब्रह्मविदपराधात्किल विपत्तिरियमावयोरुदिता॥ 579 ॥

अश्रावि विश्ववन्द्यो निगमान्तगुरुः पदा कृष्टः।
युष्मद्यात्रायामिति स च सद्यः सत्यमङ्गलमगाद्यत्॥ 580 ॥

परिचर निगमान्तगुरुं निश्चलभक्तिर्मया साकम्।
करुणापारावारः श्रेयो नौ संविधास्यते स इति ॥ **581** ॥

इत्थं पथ्यं युक्तिमदुक्तं युक्तं विनिश्चित्य।
बिरुदविहीनः पद्भ्यां प्रियया सह सत्यमङ्गलमगच्छत् ॥ **582** ॥

पत्न्या सहानुदिवसं प्रपिबन्श्रीपादातीर्थमार्यस्य।
तद्गृह एवावात्सीद्वत्सरमेकं हि लक्ष्मणाचार्यः ॥ **583** ॥

पत्नीमन्तर्वत्नीं वपुरुल्लाघ च वीक्ष्य संहृष्टः।
गुर्वनुमत्या लक्ष्मणसूरिः स्वां वासभूमिमासीदत् ॥ **584** ॥

कतिपयदिवसापगमे लेभे पुत्रं शुभे काले।
तीर्थप्रभावजातं नाम्ना च ततान तीर्थपुत्र इति ॥ **585** ॥

स विना पत्नीपुत्रौ रङ्गपुरं छात्रमात्रपरिवारः।
श्रीरङ्गेश्वरविरहं गुरुरसहिष्णुः कदाचनागच्छत् ॥ **586** ॥

कावेरीतटमण्टपमधितिष्ठति रङ्गनायके केचित्।
पुरुषा इत्थमवोचन्देवागाराधिकारिणो गूढम् ॥ **587** ॥

अत्र तु वित्तं हर्तुं तुरगारूढाः किल तुरुष्काः।
पट्टसभृतोऽट्टहसितैरुग्रा अद्योपयान्तीति ॥ **588** ॥

श्रुत्वैतद्गर्भगृहं पिधाय भीत्याधिकारिणः सर्वे।
पुरतो मण्टपमध्ये विरचय्याराधनाभिनयम् ॥ **589** ॥

सङ्गृह्य पेटिकायां रङ्गेशं रङ्गनायिकासहितम्।
कतिपयपरिजनसहिता विविशुस्त्वरिता अरण्यानीम् ॥ **590** ॥

हरिमन्वसरल्लोकाचार्यो वृत्तान्तमेनमवगम्य।
श्रीरङ्गपुरमविक्षन्मुण्डितशिरसो ह्यथ म्लेच्छाः ॥ **591** ॥

घोटीखुरपुटधाटीपटुरटनैः पटपटायितस्वान्ताः।
कष्टं कष्टं शिष्टाः प्राणपरित्राणतत्परा अभवन्॥ **592**॥

आनीलकम्बलधरा गोपुरविवरे निलिल्यिरे केचित्।
श्वासस्तम्भनचतुरा अभ्यगमन्नम्भसामधोभागान्॥ **593**॥

वनमेत्यावनमापन्यवनजनेभ्यः पलाय्य जङ्घालाः।
दूरे तीरमरुक्षन्कावेर्यां केचन निपत्य॥ **594**॥

अवकुण्ठ्य शिरः शणकैः श्मश्रुणि विधाय केचिदतिधीराः।
अचरन्पुरतस्तेषामळिके पाणिं निधापयन्तस्तैः॥ **595**॥

अन्तस्तिरस्करिण्या देवमदृष्ट्वाथ वेङ्कटेशगुरुः।
निर्गन्तुं चाशक्तोऽतिष्ठच्चिन्ताकुलस्तत्र॥ **596**॥

शारीरकभाष्यस्य व्याख्यां स्वकृतां सुदर्शनः सूरिः।
दत्त्वा व्यासपराशरनामानौ बालकौ च गुरुमूचे॥ **597**॥

अद्यैव पूरितोऽयं ग्रन्थोऽपरिशोधितस्तदमुम्।
संशोध्य प्रख्यापय बालौ तनयौ च रक्षेति॥ **598**॥

पातितभागवतानां यवनासीनामधीनतामेत्य।
स किल सुदर्शनसूरिः कष्टं दिष्टान्तमाप तदा॥ **599**॥

ग्रन्थं कुत्रचिदार्यः सिकतिलदेशे तिरोधाय।
मृतवत्परेतमध्ये शिश्ये हा हन्त बालयुतः॥ **600**॥

तुरगैरटनं परितो रचयन्ती यावनी सेना।
धुर्याञ्जहि वित्तं हर चोरय सुदतीरिति जगाद॥ **601**॥

साधितसादिमनोरथनरगन्धग्राहिसैन्धवश्वासैः।
गतरक्षणविश्वासा विश्वासा हन्त हन्त नराः॥ **602**॥

धारागतमस्तिष्कप्रत्युप्तकरोटिखण्डदन्तुरिता।
खड्गलता तौरुष्की कार्तान्ती दन्तपङ्क्तिरिव॥ 603॥

त्रैलोक्यग्रसनोदितकल्पान्तकृतान्तदूतनिभाः।
रूक्षास्तुरुष्कयोधा अघ्नन्साधून्यथाकामम्॥ 604॥

पापिष्ठेषु तुरुष्केष्वतिशुष्कमनस्सु गतवत्सु।
स्वीकृत्य ग्रन्थमगात्सहबालः सत्यमङ्गलं भूयः॥ 605॥

उपनीयोभौ बालौ शास्त्राण्यध्याप्य सर्वाणि।
भाष्यप्रकाशिकामपि संशोध्य गुरुः प्रकाशयामास॥ 606॥

तस्करहृतसर्वस्वा विपिने श्रीरङ्गनेतृनेतारः।
अधिकारिणोऽधिकाधय आपुर्ज्योतिष्पुरं कृच्छ्रात्॥ 607॥

लोकान्तरमापन्ने लोकाचार्ये ज्वरेण तदा।
कृत्वौर्ध्वदेहिकं ते सुन्दरराजाचलमवापुः॥ 608॥

सञ्चारं रचयित्वा कुलशेखरपालितेषु देशेषु।
अञ्जनभूभृति रङ्गी कञ्चन कालं सुखमुवास॥ 609॥

गत्वा यदुगिरिमार्यः कल्याणीपाथसि स्नात्वा।
नारायणं प्रणम्य स्वीचक्रे तीर्थमाल्यादि॥ 610॥

यतिपतिनिलये श्रीमान्नत्वा श्रीभाष्यकारचरणाब्जे।
आनन्दपारवश्यान्मुञ्चन्नश्रूण्यवर्तिष्ट॥ 611॥

सूक्तिसुधासङ्क्षालितकलुषा सन्तोषिता चतुर्वेदी।
शुद्धोपवीतकपटाद्यं परिरेभेऽतिवात्सल्यात्॥ 612॥

शिष्यजनमानसतमः कर्दममतिदुर्दमं च शोषयितुम्।
उदितो हंसोऽसाविति यत्काषायं ब्रवीति सन्ध्याभम्॥ 613॥

आविश्यार्चकमुच्चैर्यतिपतिरार्यं तममिदधाति स्म।
सिद्धान्तं निर्वोढा भवतः परतो भवत्तनूज इति॥ **614**॥

माल्याद्यैः संमानित आर्यो हृष्टोऽन्वगृह्णीत।
वरदाचार्यं करुणामसृणेन कटाक्षपातेन॥ **615**॥

शठजित्प्रबन्धतत्त्वान्यधिगन्तुं देशिकसकाशे।
आरेभे वरदार्यो विवव्रिरे निगमपरिमळे यानि॥ **616**॥

अनुपक्रममाणानामन्तेवसतामथान्येषाम्।
भावमपृच्छद्गुरुराट् व्यजिज्ञपन्प्रश्रयात्तेऽमुम्॥ **617**॥

आचार्यकमायत्तं यतिराजकटाक्षतो भवत्तनये।
तस्मादस्मिंस्तुल्यप्रतिपत्तिर्नैव युक्ता नः॥ **618**॥

अयमधिगत्य प्रथमं प्रबन्धतत्त्वानि संनिधौ भवताम्।
उपदिशतु नः परस्तादिति कृपयार्योऽनुगृह्णातु॥ **619**॥

दृष्ट्वा प्रवृत्तिमेषां यतिराजमतानुसारिणीमार्यः।
अशिषत्तनयं तोषात्तेषां दिव्यप्रबन्धमुपदेष्टुम्॥ **620**॥

प्रणमन्यदुगिरिलक्ष्मीनारायणभाष्यकारादीन्।
कञ्चित्कालं तत्र स्थित्वागात्सत्यमङ्गलं भूयः॥ **621**॥

आस्थानस्थं रङ्गिणमालक्ष्यास्था फलिष्यति कदेति।
विरचय्याभीतिस्तवमतितर्षादम्बुजाक्षमार्थयत॥ **622**॥

चिरविश्लेषासहने क्रन्दति तर्षेण वेङ्कटेशगुरौ।
स्वास्थाने स्थातुमना अभवच्छ्रीरङ्गनाथोऽपि॥ **623**॥

चेञ्जीराजो गोपणनामा श्रीवाससेवायै।
अञ्जनशैलं गत्वा रङ्गेशं वीक्ष्य विस्मयमवाप॥ **624**॥

कस्माद्रङ्गेशः स्वं स्थानं त्यक्त्वाऽत्र वसतीति।
विशयाकुलाय तस्मै व्यजिज्ञपंस्तत्रवासिनः सर्वम्॥ **625**॥

वृत्तं श्रुत्वा रङ्गास्थाने तं स्थापयितुकामः।
बहुसेनाभिः साकं रङ्गेशं चेञ्जिराज्यमानिन्ये॥ **626**॥

चेञ्जीस्थसिंहपुर्यां रम्यं हर्म्यं स निर्माय।
कृत्वा सरश्च सरसं रङ्गेशाराधनं चक्रे॥ **627**॥

म्लेच्छास्तु रङ्गनगरीं तुरङ्गनगरीं विधाय जनान्।
विद्राव्य ग्रामान्तरमप्याक्रम्याकुतोभया ऊषुः॥ **628**॥

सिंहो नाम्ना रङ्गेशस्य प्रत्यन्तपालकः कश्चित्।
संविदितगोपणार्यव्यवसायो म्लेच्छनायकमुवाच॥ **629**॥

अत्रत्यवृत्तवेदी सेनानीश्चेदहं भवते।
वित्तं बहु हृत्वा तद्दत्वा तृप्तिं विधास्य इति॥ **630**॥

अभ्युपगच्छति तुच्छे म्लेच्छे सेनापतित्वमेतस्य।
विश्वासार्थं सोऽर्थं हृतवान्निः श्वस्य विश्वस्य॥ **631**॥

स्वाधीनीकृतयवनश्चेञ्जीपतये लिलेख पत्रमसौ।
अभिषेणनकालं मे लिखत सहायो भवेयमिति॥ **632**॥

कालविलम्बासहनः प्रतिपत्रं गोपणो विलिख्य रयात्।
सेनाभिर्बृहतीभी रङ्गमवापद्यथाकालम्॥ **633**॥

शिष्टमनश्शल्यानामहिभयवार्तानभिज्ञानाम्।
यवनानामुपशल्ये हृदयं मद्यैरमोहयत्सिंहः॥ **634**॥

स्वैरन्तरङ्गपुरुषैः स्वैरं रङ्गेशगोपुराणि तदा।
उद्घाठ्य प्रावीविशदनीकसहितं च गोपणार्यमसौ॥ **635**॥

युद्धनिबद्धश्रद्धा यवना बुद्ध्वा रिपूंश्च संनद्धान्।
अट्टहसितोद्भटास्ते सपट्टसा रङ्गपट्टणान्निरगुः॥ **636**॥

तुरगारूढा रिपुभी रुद्धद्वाराः समुन्मिषद्रोषाः।
उरगा मन्त्रहता इव नाविन्दन्स्वैरसञ्चारम्॥ **637**॥

रावितसङ्गरभेरीघोराहतिभिर्भयङ्करा समितिः।
दृप्तैः प्राप्तैर्यवनानीकैः साकं नवा नवा ववृधे॥ **638**॥

आयुधपाळीविदळितगळनाळेभ्यो गळद्भिरस्त्रौघैः।
तुरगखुरोत्था धूळी वर्धितसुरकौतुकमशाम्यत्॥ **639**॥

काण्डैर्भिण्डीपालैर्दण्डैश्च तुरुष्कनायकांश्चण्डान्।
कुण्ठीचक्रुर्गोपण सेनानासीरचारिणो योधाः॥ **640**॥

अतत स शङ्खाध्मानं विततयशस्कोऽथ गोपणो मुदितः।
प्रतिरवमुखरितगोपुरविवरा नगरी तमभ्यनन्ददिव॥ **641**॥

निजबलमुन्मूलितबलमाकर्ण्य तथैव गोपणं जयिनम्।
बालाः पलिता ललना अखिला यवनाः पलायिषत॥ **642**॥

आनीय कान्दिशीकान्पौरानादृत्य धनधान्यैः।
स्वानि स्वानि यथासुखमोकांस्यावासयामास॥ **643**॥

आम्नायमाननानाम्नायैः शान्तैः कृपाम्बुधिभिः।
विप्रैर्विधानदक्षैर्विधाप्य पारायणं त्रय्याः॥ **644**॥

सन्तर्प्य हव्यवाहं नानाविधमन्त्रपूताभिः।
अद्भिरघौघघ्नीभिः सर्वं सम्प्रोक्षयामास॥ **645**॥

संमृष्टलिप्तकुट्टिममास्थापितपूर्णकलशीकम्।
कालागरुघुमुघुमितं भवनं श्रीरङ्गशायिनः शुशुभे॥ **646**॥

स्वयमेव गोपणार्यो गत्वा चेञ्जीं सहाखिलैर्बिरुदैः।
आनीय रङ्गनाथं तस्यास्थाने प्रतिष्ठितं चक्रे॥ **647**॥

सम्प्रोक्षणं यथाविधि कृत्वा नानोत्सवान्प्रवर्त्य विभोः।
कञ्चित्कालं तत्र स्थित्वा स्वपुरं स गोपणार्योऽगात्॥ **648**॥

श्रुत्यन्तदेशिकोऽमुं श्रुत्वा वृत्तान्तमद्भुतं तृप्तः।
झटिति कुटुम्बसमेतो रङ्गपुरीमादरादाप॥ **649**॥

चिरकाङ्क्षितार्थपूरणमाशीर्भिर्गोपणार्यमभिनन्द्य।
तत्रैव सेवमानो रङ्गेशं देशिकोऽवात्सीत्॥ **650**॥

अन्तर्ध्यातहयाननचरणाब्जगलन्मरन्ददेशीयैः।
तत्त्वार्थोपन्यासैस्तन्वति शिष्यप्रमोदमाचार्ये॥ **651**॥

आगत्य चित्रकूटात्पुरुषमुखेणाब्रवीद्धि गणिकैका।
प्रमुखास्तु चित्रकूटे कलहायन्ते परस्परममर्षात्॥ **652**॥

प्रबलो नरपालश्चेदवलम्बो लभ्यते कश्चित्।
सुशका भवेत्प्रतिष्ठा तत्र हि गोविन्दराजस्य॥ **653**॥

तदुपश्रुत्य श्रुत्यन्तार्योऽपि नितान्ततृप्तमनाः।
शिष्यैः साकमगच्छच्चेञ्जीपतिना च गोपणार्येण॥ **654**॥

गोविन्दराजमार्यो निरन्तरायं तदास्थाने।
आस्थाप्य सप्रमोदं मङ्गळमाशास्य रङ्गपुरमाप॥ **655**॥

अध्ययनोत्सवसमये कतिचन सम्भूय कुमतयः प्रोचुः।
देवागारेऽधिकृतान् कुयुक्तिवादेन संमोह्य॥ **656**॥

अप्रामाणिकतममिदमध्ययनं द्राविडप्रबन्धानाम्।
शठजित्प्रभृतीनामपि विग्रहपूजा न युक्तेति॥ **657**॥

नात्र तु दर्शयितारो यावच्छ्रीवैष्णवाः प्रमाणानि।
दिव्यप्रबन्धपाठादीनि निषेध्यानि तावदिति॥ **658**॥

अधिकारिणोऽपि मत्ता मत्वा युक्तं तदुक्तमथ।
निषिषिधुरध्ययनोत्सवमहह तदा रङ्गशायिनो भवने॥ **659**॥

अध्ययनोत्सवबद्ध श्रद्धो वृद्धान्पुरोधाय।
रङ्गेश्वरपरिवारो वेदान्तगुरोरुपान्तमेत्योचे॥ **660**॥

भगवद्रामानुजमुनिसिद्धान्तस्थापके भवति।
भास्वति भवति यदीत्थं विघ्नः सत्सम्प्रदायस्य॥ **661**॥

निर्धारयिता को वा धरणौ सिद्धान्तयाथार्थ्यम्।
तद्भगवन्देह्यभयं प्रवर्तयस्वोत्सवं च निर्विघ्नम्॥ **662**॥

सद्यः सशिष्य आर्यो रङ्गेशनिवेशमाविश्य।
साकमधिकारिभिस्तान्वादायाकारयामास॥ **663**॥

वेदान्तार्यागमनं ज्ञात्वा दुर्वादिनः सनिर्वेदम्।
क्षुद्राभिचारतस्तं मूकीकृत्यारभन्त वाक्कलहम्॥ **664**॥

तज्ज्ञात्वार्यो मनसा द्वयमनुसन्धाय मन्त्रमुच्चार्य।
क्षुद्रं निगृह्य तैः सह निरर्गळं वादमारेभे॥ **665**॥

वादे गुरुणा विजिताः स्वयमेव क्षुद्रबाधिताः खिन्नाः।
शरणीचक्रुः करुणावरुणावासस्य तस्य चरणाब्जम्॥ **666**॥

गुरुराडपि शरणागतसन्त्राणपरायणस्तेषाम्।
अभयमदादपसार्य क्षुद्रबलोत्थां च तद्बाधाम्॥ **667**॥

वादिगणव्रियमाणस्वकचरणारुणसरोजातः।
उच्चैर्वेङ्कटनाथः संसद्यधिकारिणोऽन्वशादित्थम्॥ **668**॥

वादः कारयितव्यो यदीह दुर्वादिनः समायान्ति।
इत्थं महोत्सवस्य प्रतिषेधो मा कदाचिद् भूत्॥ **669** ॥

इत्याज्ञाप्य शिलायां शासनमेतद्विलेख्य तदा।
संस्तूयमान आर्यैर्निष्प्रत्यूहं महोत्सवमकार्षीत्॥ **670** ॥

एकीकृत्य हितार्थान् कीर्णान्नानाविधेषु वेदेषु।
अखिलोज्जीवनहेतोर्ललितं ग्रन्थं विधातुमैच्छदथ॥ **671** ॥

द्वात्रिंशताऽधिकारैर्वैकुण्ठस्येव सोपानैः।
उपशोभिततममतनोत्प्रबन्धमेकं रहस्यसारयुतम्॥ **672** ॥

यं दृष्ट्वा विस्मेरास्त्रिवर्गनिरपेक्षतां यन्तः।
तुर्यपुमर्थस्थैर्यं मुमुक्षवोऽध्यक्षयन्ति सानन्दम्॥ **673** ॥

उत्तरितुं भवसागरमुपायमनवाप्य खिद्यमानानाम्।
सेतूभवन्विमुक्तेर्हृद्यां पद्यां निवेद्य यो भाति॥ **674** ॥

कुहनानिदाननानामतनीरसतामनायासम्।
संवेद्य तत्त्वबोधं कोऽन्यो ग्रन्थो वितन्वीत॥ **675** ॥

कलुषाया धिषणायाः कषणं कतकेन कर्षणं तमसः।
बोधरवेरौदयिकी सन्ध्या भवकाननस्य तु कुठारः॥ **676** ॥

नित्यारिन्यक्कारी दैत्यारिकृपाम्बुराशिराकेशः।
ग्रन्थो हृदि यस्यास्ते तस्यास्ते करगता मुक्तिः॥ **677** ॥

तस्मिन्ग्रन्थेऽङ्कुरतः शङ्कातङ्कस्य निर्हृतये।
विततान सारदीपं विरोधपरिहारमप्यार्यः॥ **678** ॥

शिल्पी कश्चिदवोचच्छिल्पज्ञं मां विजयसे चेत्।
युक्तम् भविता भवतः स्वातन्त्र्यं सर्वतन्त्रेषु॥ **679** ॥

त्वन्निर्दिष्टां प्रतिकृतिमधुना लोहेन रचयामि।
उचितं पीठं कृत्वा तां तस्मिन्स्थापयेति गुरुरूचे ॥ **680** ॥

भवतात्मप्रतिबिम्बं क्रियतामिति शिल्पिना कथिते।
पर्यालुलोचदार्यः कतमावस्थं वपुर्विधेयमिति ॥ **681** ॥

आदिशदार्यं हि तदा रङ्गेशः कञ्चिदाविश्य।
तनु तव बिम्बं रम्यं श्रीकोशज्ञानमुद्राभ्याम् ॥ **682** ॥

आकर्ण्यार्यः परमानुग्रह इति शासनं प्रशस्य तदा।
कृत्वा रम्यां प्रतिकृतिमदर्शयच्छिल्पिने तस्मै ॥ **683** ॥

शिल्पी यथाप्रतिज्ञं किञ्चित्पीठं विधाय रयात्।
आर्यस्य प्रतिबिम्बं तस्मिन्सन्धातुमारेभे ॥ **684** ॥

पीठे सम्यगसंहितमथ बिम्बं वीक्ष्य शिल्पी सः।
प्रतिकृतिदोषभ्रान्त्याऽतक्ष्णोत्तस्याः पदाब्जमायुधतः ॥ **685** ॥

आर्यस्यासृगसुस्रुवदहह तदानीं पदारविन्देन।
तत्रस्था मध्यस्था दृष्ट्वा रुधिरं विसिष्मियिरे ॥ **686** ॥

बिम्बं सुलक्षणमिदं तत्र महात्माऽयमाविष्टः।
पीठस्यैव तु दोषादयमुपजातो विसंवादः ॥ **687** ॥

इत्थं कलकल उदिते शिल्पिनि लज्जावनम्रमुखे।
पीठं संशोध्य गुरुर्बिम्बं स्वयमेव तत्र समधत्त ॥ **688** ॥

दृष्ट्वा गुरुनैपुण्यं सभ्येषु श्लाघमानेषु।
शिल्पार्थसारनामप्रबन्धमपि देशिकश्चक्रे ॥ **689** ॥

भग्नोग्राग्रह आर्यानुग्रहहेतोर्ननाम तं कारुः।
तस्यारिराधयिषया वरदाचार्येण विग्रहोऽग्राहि ॥ **690** ॥

नारायणकरुणारसधारापरिवाहपरिपाके।
अवतारे कर्तव्यान्यखिलान्यार्योऽचरीकारीत् ॥ **691** ॥

शिष्यान्विनीय शतशस्तत्त्वान्युपदिश्य गूढानि।
श्रीमद्रामानुजमुनिसिद्धान्तेऽवीवृधच्छ्रद्धाम् ॥ **692** ॥

व्यध्वं निर्धूय तथा मुक्तेः पदवीं निरूप्य रमणीयाम्।
श्रीनायकचरणाम्बुजरसिकानामाततान सन्तोषम् ॥ **693** ॥

स सहर्षं निरकार्षीदुत्कर्षं नळिननयनस्य।
निगमानुवर्तिनानानीत्याकृतिभिः कृती कृतिभिः ॥ **694** ॥

उदगादुदयागाच्छ्रीनिगमान्तगुरोरपूर्वबोधेन्दुः।
अक्षय आन्तरतिमिरापहरो विकलङ्कलवगन्धः ॥ **695** ॥

विरचय्य दृढां भक्तिं प्रमाणतत्त्वानुसारिसद्युक्तिम्।
एकैकां यत्सूक्तिं पीत्वा धीरा भजन्ति तां मुक्तिम् ॥ **696** ॥

सूक्तिसुधारसधारा प्रसभं सम्पूर्य मानसं सुधियाम्।
विषयैः कृष्टं विरजीकुरुते तापत्रयीं च यापयति ॥ **697** ॥

तत्राङ्कूरति ललिता नाथपदाम्भोजभक्तिलता।
यादृच्छिकसुकृतलवोपघ्ना या कल्पते फलाय सते ॥ **698** ॥

धीरा बद्धश्रद्धाः शुद्धिं बुद्ध्वा स्वसिद्धान्ते।
इति विज्ञाय प्राज्ञो लक्ष्मीशाज्ञामनुष्ठितां जज्ञे ॥ **699** ॥

इत्थं श्रीनिधिघण्टा श्रीवासाज्ञानुवर्तनोत्कण्ठा।
द्व्यधिकशतहायनीं सद्गुरुकुलतिलकाकृतिर्व्यलसत् ॥ **700** ॥

सौम्याब्दे कार्तिक्यां राकायामह्नि सौम्यस्य।
सौम्यः श्रीमान् रम्यं पदमगमत्तत्प्रपत्तृभिर्गम्यम् ॥ **701** ॥

पर्यङ्के नवरत्नहाटकमये श्रीनाथमाराधयन्
    दिव्यक्षेत्रगताश्च तत्प्रतिकृतीरुत्कस्तथा सेवितुम्।
सोऽयं विश्वजनीनसौख्यरचनाकौतूहलाद् भूयसी -
    ष्वर्चासु प्रतिबिम्बितो जगदघं धून्वन्समिन्धेऽधुना॥ **702**॥

द्वैतीयीको नाको येन त्रैशङ्कवोऽकारि।
यदुपज्ञं गायत्री श्रिततद्गोत्राय मङ्गळं भवतात्॥ **703**॥

ज्ञानानुष्ठितिशीलप्रमुखेरखिलैर्गुणैर्लसते।
साधुमुखाम्बुजरवये कवये बोभूयतां भवुकम्॥ **704**॥

नरकसमं नरपसभं स्त्रैणं कुणपं सुवर्णमल्पतृणम्।
भावयते हृदि भवतात्पक्त्रिमवैराग्यशालिने भवुकम्॥ **705**॥

पादूं द्वारि निबद्धां हरिदासानामिति प्रबुद्धवते।
शमधनमूर्धन्याय श्लाघ्यतमायास्तु मङ्गळं गुरवे॥ **706**॥

यस्यास्येऽस्यदमराहाराहङ्कारखण्डिनी लाला।
लक्ष्मीहयमुखमुखतस्तस्मै बोभोतु मङ्गळं गुरवे॥ **707**॥

दुर्वादिललाटन्तपयशसे विशदप्रबोधाय।
गुर्वग्रण्ये भूयो भूयो भूयश्च भावुकं भूयात्॥ **708**॥

शिष्यप्रशिष्यवर्गैर्यस्य धरेयं विदुष्मती जाता।
आचार्यश्रेष्ठाय श्वःश्रेयसमस्तु सर्वदा तस्मै॥ **709**॥

श्रीरङ्गराजलम्भितवेदान्ताचार्यबिरुदाय।
सर्वपथीनधियेऽस्मै बोभूतान्मङ्गळं गुरवे॥ **710**॥

श्रीरामानुजयतिपतिसिद्धान्तैकावलम्बाय।
करुणानिधये तस्मै गुरवे करवै नमांसि भूयांसि॥ **711**॥

यः सरसाः सूक्तिसुधा भवसागरशोषणीरुदग्रश्नात्।
भूयाद्भवुकं तस्मै चित्रचरित्राय वेङ्कटेशाय॥ **712** ॥

करतलकलितामलकीफलतुलिताखिलपुमर्थतत्त्वाय।
प्रपदनरचनाद्भगवत्यभयाय प्रतिभुवेऽस्तु कल्याणम्॥ **713** ॥

आर्यगुणप्रस्तावे धीरः स्मर्ता प्रबन्धुर्मे।
इति तच्चरितं ग्रथितं पूर्वाचार्यप्रबन्धमनुसृत्य॥ **714** ॥

अवधारयन्तु हृदि मे प्रबन्धमवधीरयन्तु वा सन्तः।
श्रीवेङ्कटनाथार्यः कवितार्किककेसरी गुरुर्दयताम्॥ **715** ॥

अध्यैष्यध्वर्युशाखामपिबमपि गिरः सत्कवीनां कणाद -
    व्याहारेषु व्यहार्षं बहुकृषिमकृषि व्याकृतौ हूणवाणीम्।
अभ्यास्यं वित्तलिप्सुः सुकृतपरिणतेर्मानसं मे स्वसक्तं
    दिष्ट्या वेदान्तविद्यागुरुचरितसुधा धूतपापं धिनोति॥ **716** ॥

गोपालार्यतुरीयसूनुरनघस्त्रय्यामजय्यः सुधीः
    रङ्गार्यः परिणीय शेङ्कमलवल्ल्याख्यां यमाजीजनत्।
कल्यब्दे चरितं सनूनम **(5007)** मिते त्रय्यन्तविद्यागुरोः
    पादाम्भोरुहभक्ततोषणमसौ गोपालसूरिर्व्यधात्॥ **717** ॥

॥ इति श्रीमत् आचार्यसप्तशती समाप्ता॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥